[illegible]

१- पुस्तक का नाम — संस्कृत-कविनवरत्नानि

२- विषय- संस्कृत के नौ रत्नभूत कवियों का वर्णन

३- मौलिक । ~~अनूदित । नवीन व्याख्या । प्रामाणिक अनुवाद~~
मौलिक

४- प्रकाशक का नाम और पता (अस्थायी एवं स्थायी)
उदय प्रकाशन सूटरगंज, कानपुर

५- लेखक का प्रमाण पत्र

(१) मैं प्रमाणित करता हूँ कि मेरी उपर्युक्त रचना प्रथम बार वर्ष १९८७ में प्रकाशित रचना है।

(२) मैं मूलतः उत्तर प्रदेश की निवासी हूँ। गत पाँच वर्षों से उत्तर प्रदेश में कार्यरत हूँ।

हस्ताक्षर लेखक

[illegible]

पता - ११/२६२
सूटरगंज
कानपुर

संस्कृतस्य नव रत्नानि

लेखिका-
कु० शोभा निगम

उदय प्रकाशन
सूटरगंज, कानपुर-२०८००१

मूल्यम्
पञ्च रूप्यकाणि

उदय प्रकाशन
सूटरगंज, कानपुर–२०८००१
द्वारा प्रकाशित।

संस्करण : १९७९ ई०

उदय (प्रिंटिंग प्रेस)
सूटरगंज, कानपुर–२०८००१
द्वारा मुद्रित।

आमुखम्

संस्कृतसाहित्यं जगतः प्राचीनतमं प्रशस्यतमं चास्ति । इदमेव कारणमस्ति यत् पाश्चात्त्यपौरस्त्याः समेऽपि विपश्चिदः साहित्यमिदं प्रशंसन्ति अभिनन्दन्ति च। परन्तु दुःखमिदं वरीवर्ति यत् सम्प्रति केचन पाश्चात्त्यशिक्षादीक्षिताः भारतीयताभारतीविमुखाः वस्तुतत्त्वानभिज्ञाः स्वार्थसाधनैकरताः मिथ्यापाण्डित्यमुकुलितलोचनाः सन्तः सुरभारतीमपि विनिन्दन्ति, अस्याः अनुपादेयतां च प्रतिपादयन्ति । अत्र मन्ये तेषां तथा न स्खलनम्, यतो हि ते वस्तुस्थितिं न जानन्ति, तैः कदापि सुरभारती न सेविता नापि च भारतीयता हि आत्मसात्कृता । तेषां हृदयानि तु पाश्चात्त्यचाकचक्येन चकितीकृतानि सन्ति । एते खलु यदा महत्त्वपूर्णं पदं लभन्ते तदा सुरभारतीं न बहु मन्यन्ते । अतएव सम्प्रति प्रायः श्रूयते यदनेन प्रान्तीयसर्वकारेण सुरभारती अमुकपाठ्यक्रमाद् निष्कासिता । यद्यपि तत्र तेषां स्वार्थवृत्तिस्तु वर्तते एव परन्तु संस्कृतभाषाऽनभिज्ञतापि कारणमस्ति । एतद्वीक्ष्यैव मया चिन्तितं यद् संस्कृतसाहित्ये यद् रत्नभूतमुत्कृष्टतमं चास्ति तत्संक्षिप्य प्रस्तोतव्यम् । अस्मिन् प्रसङ्गे तत्रादौ संस्कृतसाहितस्य रत्नभूताः कृतयः (कवयः) प्रस्तूयन्ते । ते कवयः तेषु तेषु क्षेत्रेषु उत्कृष्टतमाः तत्र तत्र स्वकीयं वैशिष्ट्यं भजन्ते, अतएव रत्नप्रायाः सन्ति, यतो हि प्रथितमस्ति—'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते ।'

अत्र प्रतिनिधिभूतानि नव रत्नानि सन्ति—(१) आदिकविः महर्षिवाल्मीकिः (रामायणम्), (२) महर्षिवेदव्यासः (महाभारतम्), (३) कविकुलगुरुः महाकविकालिदासः, (४) कवितावनिताहासः महाकविभासः, (५) संस्कृतसाहित्याकाशरविः महाकविभारविः, (६) प्रौढपाण्डित्यनिदाघः महाकविमाघः, (७) कवितासुन्दरीहर्षः महाकविश्रीहर्षः, (८) कविताकामिनीविभूतिः महाकविभवभूतिः, (९) कविताकान्तापञ्चबाणः महाकविबाणश्चेति । मन्ये, एतेषाम् अध्ययनेन जनाः संस्कृतसाहित्यस्य माहात्म्यम् अवगन्तुं प्रभविष्यन्ति, तेन चास्य समादरं करिष्यन्ति । सर्वे जनाः हृदयङ्गमं

कुर्युः संस्कृतसाहित्यस्य च माहात्म्यम् अवगच्छेयुः, इति विचार्यैव अत्र भाषा सरला, रुचिरा, श्लक्ष्णा च प्रयुक्ता, यत्र तत्र भावानामाभा, गभीरा भाषापि च तदनुकूलेव, तत्र विषयानुरूपतैव कारणम् ।

अस्मिन् प्रसङ्गे स्वकीयं श्रद्धेयं गुरुवरं संस्कृतसाहित्यावारपारीणं श्रीमन्त प्रो० शिवबालकद्विवेदिनं (प्राध्यापकं--डी० ए० वी० कालेज, कानपुरस्य) भूयोभूयः स्मरामः नमामः अभिनन्दामश्च । येषां प्रेरणया, प्रसादेन, अनुग्रहेणैव एषा कृतिः निर्मिता । तैः खलु समयाभावे सत्यपि निर्देशो विहितः, एषा कृतिः समवलोकिता च । अन्येऽपि ते सर्वे बुधवर्याः वन्द्याः यैः अस्माकं सहायता कृता । उदयप्रकाशनव्यवस्थापका अपि सर्वथा धन्यवादार्हाः; यैरचिरेणैव कृतिरेषा प्रकाशिता । यदि अनया मनागपि संस्कृतस्य सेवा स्यात्तर्हि अहं स्वकीयं श्रमं सफलमवगमिष्यामि । अत्र स्खलनार्थमहं बुधजनान् क्षमां संयाचे । यतो हि--

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

कृष्णाष्टमी, २०३६ वि० सं० । —शोभा निगमा

अनुक्रमः

–०––०–

१. रम्या रामायणी कथा

अथवा

वन्दे वाल्मीकिकोकिलम्

प्रस्तावना—संस्कृतसाहित्यविदुषामभिमतमस्ति यदस्य लौकिकसाहित्यस्य आदिकाव्यं रामायणमस्ति । अस्य रामायणाख्यस्यादिकाव्यस्य प्रणेता महर्षिः वाल्मीकिरस्ति । एकदा महर्षिः वाल्मीकिः माध्यन्दिनसवनाय तमसानदीं ययौ । तत्र रमणीयं प्रसन्नसलिलं सवीक्ष्य विचचार । तत्र निषादेन निपातितं शोणितपरीताङ्गं भूतले चेष्टमानं क्रौञ्चाख्यं द्विजं ददर्श । तस्य पक्षिणः भार्या निहतं पतिं दृष्ट्वा सकरुणं रुराव । परमधार्मिको वाल्मीकिः रुदतीं क्रौञ्चीं निशाम्य सहसा इदं वचनमब्रवीत्—

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।"

(रामायणम् १।२।१५)

ततः स मुनिपुङ्गवोऽचिन्तयत्—

"पादबद्धोऽक्षरसमः तन्त्रीलयसमन्वितः ।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ।।"

एवमस्य शोक एव श्लोकतां गतः । ततः तत्समीपे लोककर्ता ब्रह्मा आजगाम, अब्रवीच्च वाल्मीके ! रामस्य चरितं लिख । एवं पितामहप्रेरितो वाल्मीकिः रामचरितं लिलेख ।

रामायणस्य महत्त्वम्—रामायणं भारतस्य राष्ट्रियं महाकाव्यमस्ति । महाकाव्यमिदं भारतीयां संस्कृतिं प्रतिनिधत्ते । अत्र लोकारामस्य नयनाभिरामस्य श्रीरामचन्द्रस्य चरित्रं चित्रितमस्ति । रामायणे विविधानि वैशिष्ट्यानि विलसन्ति । अस्य भाषा मधुरा, रुचिरा, रसपेशला, प्रसादमाधुर्यगुणोपेता चास्ति । अत्र विविधा. विषयाः व्यवहारमुखेन प्रतिपादिताः सन्ति । परवर्तिभिः सहृदयैः बुधैरस्य प्रशंसा कृता । महाकविः कालिदासः रघुवंशमहाकाव्ये रामायणमेवं प्रशशंस—

"ताभ्यगच्छद् रुदितानुसारी
मुनिः कुशेध्माहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः
श्लोकत्वमापद्यत यस्य शोकः ।।

(रघुवंशमहाकाव्यम् १४।७०)

सहृदयानामानन्दवर्धनेन साहित्यरसास्वादनपरेण ध्वनिवादिनाचार्यानन्दवर्धनेन.पि तत्रैवमभ्यधायि--

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ।।

(ध्वन्यालोकः १।५)

सुभाषितपद्धतिरचयिता शार्ङ्गधरोऽपि कवीन्द्रं वाल्मीकिं रामायणाकथां चैवं प्रशशंस--

'कवीन्द्रं नौमि वाल्मीकिं यस्य रामायणीकथाम् ।
चन्द्रिकामिव चिन्वन्ति चकोरा इव साधवः ।।'

वाल्मीकेः जीवनवृत्तम्--वाल्मीकेः पिता प्रचेता आसीत् । स्कन्दपुराणेऽस्य विषये एवं वर्णनमुपलभ्यते-अयं वाल्मीकिः जन्मान्तरे व्याध आसीत् । तत्र व्याधजन्मनि शङ्खमुनेः सङ्गाद् रामनामजपेनायं जन्मान्तरे अग्निशर्मा ब्राह्मणोऽभवत् (मतान्तरेणास्य नाम रत्नाकर आसीत्) । अस्मिन् जन्मन्यपि प्राक्तनसंस्कारादयं व्याधकर्मण्येव व्यासक्तोऽभूत् । तदनन्तरं सप्तर्षिसङ्गात् 'मरा मरा' इति जपित्वा तपस्यासमये वाल्मीकावृतशरीरत्वादयं 'वाल्मीकि' रिति नामधेयेन जगति प्रसिद्धिं प्राप । ततोऽयं लोकप्रसिद्धम् आदिकाव्यं रामायणम् अरीरचत् ।

महाकाव्यं रामायणम्--आदिकाव्यं रामायणं महाकाव्यमस्ति । मन्ये इदं सत्यं लक्ष्यरूपमस्ति । एतम् आश्रित्यैव साहित्यशास्त्रिणो महाकाव्यस्य लक्षणं रचयामासुः । अत्र आदर्शमहाकाव्यस्य सर्वे गुणाः विलसन्ति । रामायणमहाकाव्यम् अधीत्य जनः सद्यःपरनिर्वृतिं लब्धुं शक्नोति ।

रामायणे रसाभिनिवेशः—रामायणस्य प्रधानरसः करुणोऽस्ति । कवितावनितानन्दवर्धनः आचार्यः आनन्दवर्धन एवं लिखति—'रामायणे हि करुणो रसः ।' अपि च—

"काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ।।"

यद्यपि मुख्यः करुणरसः, अन्येषामपि स्थितिः श्लाघ्या । यथा च कथितमस्ति—

"रसैः शृङ्गारकरुणहास्यरौद्रभयानकैः ।
वीरादिभी रसैर्युक्तं काव्यमेतदगायताम् ।।"

एवमेषा कृतिः नवरसरुचिरा भव्यभावविभूषिता च । शृङ्गाररसोपेतं श्लोकं विलोकयन्तु—

"दर्शयन्ति शरन्नद्यः पुलिनानि शनैः शनैः ।
नवसङ्गमसव्रीडा जघनानीव योषितः ।।"

अन्यच्च—

"मीनोपसंदर्शितमेखलानां नदीवधूनां गतयोऽद्य मन्दाः ।
कान्तोपभुक्तालसगामिनीनां प्रभातकालेष्विव कामिनीनाम् ।।"

भाषासुन्दरीविलासः--रामायणस्य भाषा सरसा, सरला, प्रसादगुणोपेता च। अत्र सर्वत्र स्वाभाविकता वर्तते। सा स्वकीयैः ललितललितैः सुमनोहरैः विलासैः सहृदयान् प्रीणयति। विलासवतीनायिकेव मन्दस्मिता राजते। भावप्रकाशने सर्वत्र सक्षमा। कवेर्भाषासुन्दरी भावमनुसरति। भाषासौन्दर्यं विलोकयन्तु—

"जलं प्रसन्नं कुसुमप्रहासं क्रौञ्चस्वनं शालिवनं विपक्वम्।
मृदुश्च वायुर्विपुलश्च चन्द्रः शसन्ति वर्षव्यपनीतकालम्॥"

तथा च--

"वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजा वनान्ता प्रियविहीनाः शिखिनः प्लवङ्गमाः॥"

अलङ्कारच्छटा--महाकविः वाल्मीकिः स्वकीयां कविताकामिनीं विविधैरलङ्कारैरलञ्चकार। अनुप्रासः, उपमा, रूपकम्, उत्प्रेक्षा, अतिशयोक्तिः, प्रतीपप्रभृतयः तस्य प्रियाः अलङ्काराः। सर्वत्र अलङ्काराणां स्वाभाविकः प्रयोगः। उपमाप्रयोगं पश्यन्तु--

"रविसङ्क्रान्तसौभाग्यस्तुषारारुणमण्डलः।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते॥"

समासोक्तिविभूषितं श्लोकं विलोकयन्तु—

"चञ्चच्चन्द्रकरस्पर्शहर्षोन्मीलिततारका।
अनुरागवती सन्ध्या जहाति स्वयमम्बरम्॥"

छन्दः--आदिकविवाल्मीकेरादिच्छन्दः अनुष्टुप्। रामायणे प्रायः अनुष्टुबेव छन्दः। इन्द्रवज्रा--उपेन्द्रवज्रा--उपजातिप्रभृतीनि अपि छन्दांसि विराजन्ते।

प्रकृतेर्नन्दनं वनम्--रामायणस्य प्रकृतिचित्रणं सरसं स्वाभाविकं च। अत्र प्रकृतिनटी सर्वत्र नरीनृत्यते। प्रकृतेः सुन्दरता, सरसता, रमणीयता च सर्वत्रैव विराजते। सायंकालसौन्दर्यं पश्यन्तु--

"सम्प्रवृत्ता निशा सीते नक्षत्रसमलङ्कृता।
ज्योत्स्नाप्रावरणश्चन्द्रो दृश्यतेऽभ्युदितोऽम्बरे॥"

वर्षर्तोः स्वाभाविकं दृश्यं पश्यन्तु--

"घनोपगूढं गगनं न तारा न भास्करो दर्शनमभ्युपैति।
नवैर्जलौघैर्धरणी वितृप्ता तमो विलिप्ता न दिशः प्रकाशाः॥"

पम्पायाः स्वाभाविकं स्वरूपं विलोकयन्तु--

"इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वतः।
नलिनानि प्रकाशन्ते जले तरुणसूर्यवत्॥
एष कारण्डवः पक्षी विगाह्य सलिलं शुभम्।
रमते कान्तया सार्धं काममुद्दीपयन्निव॥"

रामायणकालीना संस्कृतिः--रामायणम् अस्माकं संस्कृतिं प्रतिनिधत्ते। एतद् भारतीयसंस्कृतिप्रतिनिधिकाव्यमस्ति। धर्मस्य, सत्यस्य, वृत्तस्य च प्राधान्यमस्ति। इमं

श्लोकं विलोकयन्तु-

"सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः ।
मुदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥"

तथा च--

"धर्मार्थकामाः खलु जीवलोके समीक्षिता धर्मफलोदयेषु ।
ये तत्र सर्वे स्युरसंशयं मे भार्येव वश्याभिमता सपुत्रा ॥"

तत्र जनाः दानदयाध्ययनशीलाः सुसंयताः, आस्तिकाः, बहुश्रुताः, बहुज्ञाः, सत्यवादिनः, विद्वांसः तपस्विनश्चासन् ।

रामराज्यस्य वैशिष्टयं तु सर्वथा समीचीनम्-

"नाकाले म्रियते कश्चिन्न व्याधिः प्राणिनां तथा ।
नानर्थो विद्यते कश्चिद् रामे राज्यं प्रशासति ॥"

अलौकिकगुणगणविभूषितस्य अस्य रामायणकाव्यस्य सर्वत्र प्रशंसा कृता वर्तते । रामायणकाव्यरसामृतं निपीय जनः परं पदं लब्धुमर्हति । यथोक्तम्---

"वाल्मीकेः कविसिंहस्य कवितावनचारिणः ।
शृण्वन् रामकथानादं को न याति परं पदम् ॥"

रामायणस्य अधोलिखिता सूक्तिस्तु परमप्रसिद्धा--

"सदूषणापि निर्दोषा सखरापि सुकोमला ।
नमस्तस्मै कृता येन रम्या रामायणी कथा ॥"

------

२. भारतं पञ्चमो वेदः

अथवा

वेदव्यासः

महत्त्वम्--विश्वसाहित्ये विशालकलेवरस्य भारतभारतीकीर्तिकौमुदीविकीर्णरतस्य महाभारतस्य अप्रतिमं स्थानं वर्तते । भारतीयायाः संस्कृतेः सभ्यतायाश्च सुरम्यं स्वरूपमस्मिन् महाकाव्ये सम्यक् विराजतेतराम् । ग्रन्थोऽयं धर्मार्थकाममोक्षाणामादर्शः । अस्मिन् विषये स्वयमेव महाभारतं भणति--

"धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥"

अस्मिन् ग्रन्थे पुरुषार्थचतुष्टयस्य व्यावाहारिकं स्वरूपं दरीदृश्यते । भारतीय-धर्मदर्शनराजनीति-अर्थनीतिप्रभृतिविषयाणामयं प्रामाणिको विवेचकः । एवमत्र समासेन कथयितुं शक्यते यद् महाभारते महर्षिवेदव्यास ऐहिकामुष्मिकसमस्तसंविदः सविस्तरं व्यवारीत् ।

महाभारतस्य रचयिता--भारतीयमनीषिणो महाभारतस्य कर्तृत्वरूपेण वेदव्यासं मन्यन्ते । अस्य मातुर्नाम सत्यवती । वेदानां विस्तारकरणादयं वेदव्यासेति नाम्ना प्रसिद्धोऽभूत् । यथोक्तं महाभारते--

"ब्रह्मणो ब्राह्मणानां च तथानुग्रहकाङ्क्षया ।
विव्यास वेदान् यस्मात् स तस्माद् व्यास इति स्मृतः ।।"

अयमेव व्यासोऽष्टादशपुराणानामपि प्रणेता। मैक्समूलर–विण्टरनिट्ज–मैक्डानल-प्रभृतिपाश्चात्यविपश्चिदामभिमतमस्ति यद् व्यासस्य मूलग्रन्थं वैशम्पायनोऽवर्धयत् । वैशम्पायनस्य ग्रन्थं वर्धयित्वा सौतिः लक्षश्लोकात्मक महाभारतं प्रास्तौत् । सेठ कन्हैयालाल पोद्दारः पाश्चात्यविपश्चिदां मतं निराकृत्य महाभारतस्य कर्तृत्वरूपेण वेदव्यासमेव स्वीकरोति । महाभारतेऽपि लिखितमस्ति यद् महर्षिः वेदव्यासः एतद्महाकाव्यं वर्षत्रयेण प्रणिनाय--

"त्रिभिर्वर्षैः सदोत्थाय कृष्णद्वैपायनो मुनिः ।
महाभारतमाख्यानं कृतवानिदमुत्तमम् ।।"

विषयवस्तु--महाभारते अष्टादश पर्वाणि सन्ति । तानीमानि--१-आदिपर्व, २-सभापर्व, ३-वनपर्व, ४-विराटपर्व, ५-उद्योगपर्व, ६-भीष्मपर्व, ७-द्रोणपर्व, ८-कर्णपर्व, ९-शल्यपर्व, १०-सौप्तिकपर्व, ११-स्त्रीपर्व, १२-शान्तिपर्व, १३-अनुशासनपर्व, १४-अश्वमेधपर्व, १५-आश्रमवासिपर्व, १६-मौसलपर्व, १७-महाप्रस्थानिकपर्व, १८-स्वर्गारोहणपर्व च । लक्षश्लोकपरिमितत्वादिदं 'शतसाहस्रीसंहिता' इत्यपरेणाभिधानेनापि प्रथितमस्ति । हरिवंशपुराणमत्र परिशिष्टरूपेण विराजते ।

महाभारते रसाभिनिवेशः--महाभारतस्य प्रधानरसः शान्तोऽस्ति । अस्यायमुपदेशोऽस्ति यद् मानवः सांसारिकं भोग्यविलासवस्तु परित्यज्य मनो निगृह्य सलिलराशौ कुशेशयमिव व्यवहरेत् तदैव सः परां निर्वृतिं प्राप्तुं शक्नोति । इदमैहिकं कामसुखं पारलौकिकं दिव्यसुखं च निन्दति, तृष्णाक्षयजन्यानन्दं च प्रशंसति--

"यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ।।"

वीरश्रृङ्गारभयानकादिरसा अङ्गरूपेणात्र विराजन्ते । पाण्डवानां क्रोधोद्दीपनार्थं कुन्ती भगवन्तमधोक्षजमेवं निवेदयति--

"पराश्रिता या जीवति वासुदेव धिगस्तु ताम् ।
वृत्तेः कार्पण्यलब्धाया अप्रतिष्ठैव ज्यायसी ।।"

श्रृङ्गाररसस्योदाहरणं पश्यन्तु--

"अयं स रसनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ।।"

भाषा--महाभारतस्य भाषा मधुरा, सरसा, सरला, प्रसादगुणोपेता च । अत्र मनागपि कृत्रिमता भाषां न स्पृशति । वेदव्यासस्य भारतप्रयागेऽस्मिन् सरलसरसस्वाभाविकरीतित्रिवेणीरम्या भाषा सुशोभतेतराम् । यत्र निमज्ज्य भावुको भावकः सहसैव परमानन्दं लब्धुं शक्नोति । भाषायाः निसर्गसौन्दर्यं पश्यन्तु--

"सुनीलमसितापाङ्गी सर्वगन्धाधिवासितम् ।
सर्वलक्षणसम्पन्नं महाभुजगवर्चसम् ॥
केशपक्षं वरारोहा गृह्य वामेन पाणिना ।
पद्माक्षी पुण्डरीकाक्षमुपेत्य गजगामिनी ॥
अश्रुपूर्णेक्षणा कृष्णा कृष्णं वचनमब्रवीत् ।"

भगवतो गोविन्दस्य सुखदायिनं मार्गं विलोकयन्तु--

"ववर्ष पुष्पवर्षं च कमलानि च भूरिशः ।
समश्च पन्था निर्दुःखो व्यपेतकुशकण्टकः ।"

छन्दोऽलङ्कारान्विति:-महाभारते अलङ्काराणां स्वाभाविक उपन्यासः । अनुप्रास-यमक-उपमा-रूपक-उत्प्रेक्षाप्रभृतयोऽलङ्काराः प्रायो लभ्यन्ते । महाकाव्ये अनुष्टुप्-छन्दसः प्रयोगो वर्तते । यत्र-तत्र इन्द्रवज्रोपेन्द्रवज्रोपजातिप्रभृतीन्यपि छन्दांसि विलोक्यन्ते ।

महाभारतस्योद्देशः--महाभारतं धर्मस्वरूपं बहुधा न्यरूपयत् । धर्मस्य विषये कथयति—

"धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्मादधर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् ॥"

अपि च— धर्मकार्यं यतञ्छक्त्या नो चेत् प्राप्नोति मानवः ।
प्राप्तो भवति तत्पुण्यमत्र मे नास्ति संशयः ॥"

अत्र नीतिशिक्षाविषयीणि नैकानि खलु सुभाषितानि । इदं वित्तवृत्तयोर्मध्ये वृत्तं प्रशंसति । वृत्तस्य महिमा महीयान्—

"वृत्तेनैव भवत्यार्यो न धनेन न विद्यया ।
वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतोहतः ॥"

भौतिकव्यवहारविषये एवं कथयति--

"यस्मिन् यथा वर्तते यो मनुष्यस्तस्मिन् तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया वर्तितव्यः साध्वाचारः साधुना प्रत्युपेयः ॥"

यदि कदाचित् शत्रुरपि अतिथिरूपेण आगच्छेत् तदा तस्यापि सत्कारं प्रकुर्वीत—

"अरावप्युचितं कार्यमातिथ्यं गृहमागते ।
छेत्तुमप्यागते छायां नोपसंहरते द्रुमः ॥"

दार्शनिकरहस्योपेतानि दिव्यसूक्तानि दर्शनीयानि सन्ति--

"अंगुष्ठमात्रः पुरुषोऽन्तरात्मा लिङ्गस्य योगेन च याति नित्यम् ।
तमीशमीड्यमनुकल्पमाद्यं पश्यन्ति मूढा न विराजमानम् ॥"

महाभारतं कर्मणि सम्यग् अनुरज्यति । अस्यायं दृढीयान् विश्वासो यदसक्तः सन् कर्माचरन् मानवः परमार्थमधिगच्छति--

"प्रायसो हि कृतं कर्म नाफलं दृश्यते क्वचित् ।"

व्यावहारिकजीवनदर्शनविषये धनं प्रशंसन् एवं कथयति--

"धनात् कुलं प्रभवति धनाद् धर्मः प्रवर्धते ।
नाधनस्यास्त्ययं लोको न परः पुरुषोत्तमः ।।"

भारतं पञ्चमो वेदः--वेदानामत्र व्यावहारिकसंसिद्धिः विलोक्यते । वेदेषु ये सिद्धान्ताः सूत्ररूपेणोपन्यस्ताः सन्ति तेषामत्र सम्यगन्वाख्यानं कृतमस्ति । वेदचतुष्टयस्य या संवित्तिः वर्तते तस्याः व्यावहारिक विवेचनमत्र वर्तते । अत एव भगवतं भणति--

"भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ।
दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ।।"

अत एवास्य वेदवद् उत्कृष्टत्वं पवित्रत्वं धर्मपरायणत्वं च प्रेक्ष्य विपश्चिदः उद्-घोषयन्-'भारत पञ्चमो वेदः ।'

यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्-महाभारतमिदं महत्त्वाद् विविध-गम्भीरविषयोपेतत्वाच्च 'विश्वकाशः' कथयितु शक्यते । अत्र वैदिकाः लौकिकाश्च सर्वेऽपि विषयाः विराजन्ते । अत्र वेदतत्त्वम्, दर्शनम्, काव्यम्, ऐतिह्यम्, आख्यानम्, राजनीतिः, अन्यच्च यदपि लोकोपकारकं तत्त्वजातं वर्तते तत्सर्वमत्र वेदव्यासेन रुचिरया सरलया च शैल्या संगृह्य प्रस्तुतम् । अत एव धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयस्य कृते यद् महाभारते तदेवान्यत्र लभ्यते यत्खल्विह नास्ति तदन्यत्रापि न वर्तते । एवमत्र कथयितुं शक्यते यदिदं महाभारतमादर्श इव सुशोभते यत्र सर्वविधाः सांसारिकप्रवृत्तयः प्रतिबिम्बिताः दृश्यन्ते । अस्य गुणगौरवं समीक्ष्यैव वेणीसंहारे भट्टनारायणो भणति-

"श्रवणाञ्जलिपुटपेयं विरचितवान् भारताख्यममृतं यः ।
तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे ।।"

स्वगुणगौरवैरेव महर्षिवेदव्यासः त्रिदेववदाद्रियते--

"अचतुरवदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् बादरायणः ।।"

कामये, एतन्महाभारतं नः श्रेयसे भूयात्--

"पाराशर्यवचः सरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरैर्हरिकथासम्बोधनाबोधितम् ।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद् भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे ।।"

---

३. कविकालिदासः

अथवा

कविकुलगुरुः कालिदासो विलासः

परिचयः--संसारे संस्कृतभाषायाः स्थानम् अप्रतिममस्ति । अत्र अनेके प्रख्याताः कवयः सन्ति, येषां सूक्तिसुधारसं निपीय को न जगति मोदते ? तेषां ललितललितानि काव्यकलाकलितानि मधुरमधुराणि वचनानि केषां चेतांसि च न चोरयन्ति ? एतेषु रस-सिद्धकविषु कवितावनिताविलासः कविकुलगुरुः कालिदासः महत्त्वपूर्णं स्थानं भजते ।

महाकविकालिदासस्य सम्यक् परिचयः अद्यापि न ज्ञायते—तेन को देशः समलङ्कृतः ? कस्मिन् कुले स जन्म लेभे । कौ तस्य मातापितरौ ? कुत्र सः स्वकीयां कविताकामिनीमलञ्चकार ? कुत्र च सः पञ्चत्वं प्राप ? इति सर्वमेव अनिश्चितं वर्तते ।

वैशिष्ट्यम्—अयं कविशिरोमणिः सर्वतन्त्रस्वतन्त्रः सकलकलाविशारदः, वशीकृतशारदः, समस्तशास्त्रसारनिष्यन्दः, काव्यकुमुदकोशविकासविभाकरः, प्रसादगुणाराधितभाषापदः, वैदर्भीरीतिसभाजनसभ्यः, कविताकामिनीकान्तः, उपमासीमन्तिनीसीमन्तसिन्दूरदानसिद्धहस्तः, काव्यरचनाक्रमैकविक्रमादित्यः, महाराजविक्रमादित्यसभाभास्वरभास्करः, कविकादम्बकदम्बसमाराधितपादपद्मः, गीर्वाणवाणीवरदवत्सः, भारतमातृमौलिमुकुटहीरकः, मुकुटालङ्काररहितोऽपि कविकुलसार्वभौमः, समभ्यर्चितचामुण्डाचरणः, प्रकृतिनटीसमाराधननिपुणः, विद्योत्तमाद्योतितान्तःकरणः, विश्वविश्रुतकीर्तिः महाकविः कालिदासः ।

स्थितिकालः—अमुष्य स्थितिकालविषये बुधेषु मतैक्यं नास्ति । अत्र विदुषां मतत्रयं लभ्यते—१—तत्र प्रथमं खिृष्टाब्दतः पूर्वं प्रथमशताब्द्याम्, २—द्वितीयं खिृष्टाब्दतः पश्चात् पञ्चशताब्द्याम्, ३—तृतीयं खिृष्टाब्दतः पश्चात् षष्ठशताब्द्याम् ।

१—प्रथममतस्य समर्थकाः प्रायः सर्वे विद्वांसः सन्ति, तेषामभिमतमस्ति यत् कालिदासो महाराजविक्रमादित्यस्य नवरत्नेषु अन्यतमः । ई० पू० ५७ तमे वर्षे विक्रमसंवतः प्रारम्भो जातः । अन्तः साक्ष्यम् अवलम्ब्यापि इदं मतं पुष्टतां प्राप्नोति । मालविकाग्निमित्रस्य कथांशेन ज्ञायते यद् महाकविकालिदासः शुङ्गवंशस्य इतिहासाभिज्ञः । अस्य काव्यरचना स्वाभाविकी सत्यपि महाभाष्यम् अनुकरोति । प्रवृत्तिरेषा खिृष्टीयशताब्दीतः त्रिंशद्वर्षपूर्वतः प्रचलन्ती खिृष्टीयाब्दस्य प्रारम्भिककालं यावत् खलु दृश्यते ।

२—द्वितीयमतस्य ये खलु समर्थकाः सन्ति तेषां कथनमस्ति यद् गुप्तकालः भारतीयसाहित्यस्य स्वर्णयुगः आसीत् । द्वितीयचन्द्रगुप्त एव विक्रमादित्यस्य सम्मानोपाधिम् अधारयत्, अनेनैव शकाः पराजिताः, तथा कालिदासस्य काव्येषु अश्वघोषस्यापि पर्याप्तः प्रभावः । अतः कविकालिदासः गुप्तकालिकः ।

३—तृतीयमतस्य प्रवर्तकः फर्गुसनमहोदयो बभूव । अस्याभिमतमस्ति यत् ५४४ तमे खिृष्टाब्दे विक्रमादित्योपाधिधारिणा केनचिद् राज्ञा हूणाः निर्जिताः । अस्य विजयस्योल्लासे तेन स्वकीयः संवत्सरः स्थापितः । मैक्समूलरमहोदयोऽपि मतमिदं स्वीकुरुते । डॉ० हार्नली—महाभागो भणति यद् महाकविकालिदासस्य आश्रयदाता नृपतिः श्रीमान् यशोवर्मा अष्टमशताब्द्याम् आसीत् । कालिदासेन तस्यैव यात्रावर्णनव्याजेन रघोःदिग्विजययात्रा वर्णिता ।

परन्तु प्रायो विदुषामभिमतमस्ति यद् आद्यमेव मतं समीचीनम् ।

कृतयः—महाकविः कालिदासो महाकाव्यद्वयं लिलेख—१—कुमारसम्भवम् । २—रघुवंशञ्चेति । द्वे गीतिकाव्ये—१. ऋतुसंहारम् २. मेघदूतञ्चेति । त्रीणि नाटकानि—१—मालविकाग्निमित्रम्, २—विक्रमोर्वशीयम्, ३—अभिज्ञानशाकुन्तलञ्चेति ।

अस्य महाकवेः चत्वारिंशत्संख्यातोऽपि अधिकाः कृतयः समुपलभ्यन्ते । तासु उपर्युक्ताः

प्रसिद्धाः । अन्याः प्रमुखाः कृतयः–राक्षसकाव्यम्, कुन्तलेश्वरदौत्यकाव्यम्, दुर्घटकाव्यम्, नलोदयकाव्यम्, वृन्दावनकाव्यम्, विद्वद्विनोदकाव्यम्, श्रुतबोधः, पुष्पबाणविलासः, ज्योतिर्विदाभरणम्, नवरत्नमाला, कालीस्तोत्रम, गङ्गाष्टकम्, चण्डिकादण्डकम्, श्यामलादण्डकम्, मकरन्दस्तवः, अम्बास्तवः, लक्ष्मीस्तवः, लघुस्तवः, कल्याणस्तवः शृङ्गारतिलकप्रभृतयश्च ।

अस्य नाटकरत्नं शाकुन्तलं पठित्वा शार्मण्यविदग्धकविः गोटे (Goethe) भावाकुलितमानसः सन् एवम् अगायत्--

"Willst dudie Blute des fruhen die Fruchte des spateren Jahres Willst du, was reizt und entzuckt willst, was sattigt und nahert, willst du den Himmel, die Erde mit linem Namen begreifen Nenn ich, Sakontala, dich, und so ist alles gesagt."

महामहोपाध्यायः श्री वासुदेवविष्णुमिराशीमहोदयोऽस्य संस्कृतानुवादमेवं करोति--

"वासन्तं कुसुमं फलञ्च युगपद् ग्रीष्मस्य सर्वं च यद्
यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम् ।
एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयो—
रैश्वर्यं यदि वाञ्छसि प्रियसखे शाकुन्तलं सेव्यताम् ॥"

रचनाशैली--कालिदासस्य भाषासुन्दरी सरसा, सरला, मधुरा, रुचिरा, प्रसादगुणोपेता च । तस्य कृतिषु यन्माधुर्यं, यल्लालित्यं, यत् सहृदयत्वं च प्राप्यते तदन्यत्र न । कवेः भाषासुन्दरी सर्वत्रैव मन्दस्मिता सती विराजते । सर्वत्र स्वाभाविकं माधुर्यं विलसति । कुत्रचिदपि कृत्रिमं पाण्डित्यं नावलोक्यते । कवेर्भाषासुन्दरी अपि नायिका शकुन्तलेव दिव्यं नैसर्गिकं लावण्यं भजते । तस्याः ललितललितानि प्रसादगुणोपेतानि सुमनोहराणि विविधविलासविलसितानि कर्णामृतानि, स्वान्तरसायनानि, हृद्यानि अनवद्यानि पदानि सहसैव सहृदयानां चेतांसि चोरयन्ति । तस्य रसाश्लिष्टः स्वाभाविको मधुरविलासव्यापारः सहृदयहृदयमेव चुम्बति । तस्य कवितासुन्दरी अलङ्काराणां कृत्रिमव्यापाराणां च अपेक्षां न श्रयते–'किमिव हि मधुराणां मण्डनं नाकृतीनाम्' । सर्वत्र भाषा कवेर्भावमनुगच्छति--'को नाम इदानीमुष्णोदकेन नवमालिकां सिञ्चति' । वर्णनेषु स्वाभाविकता सजीवता च । तस्य कवितावनिता कलाभावाभ्याम् उभाभ्यां समलङ्कृता । अतएव कथयति महाकविः जयदेवः--'कविकुलगुरुः कालिदासो विलासः' । तस्य रचना ललिता, परिष्कृता प्रसादगुणोपेता च । वैदर्भीरीतिप्रयोगस्य तु असौ अनुपमेयः शिल्पी । सुकुमारश्राङ्गारिककोमलकारुणिकभावानामभिव्यञ्जने कविरसौ सिद्धहस्तः । सुकुमारश्राङ्गारिकभावमस्मिन् श्लोके विलोकयन्तु—

"अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥"

कोमलकारुणिकभावमत्र पश्यन्तु--

"शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥"

महाकविकालिदासस्य अन्तश्चरितं (Inner Culture) अकलुषं मनोहारि प्रभावकारि दिव्यं हृद्यं सत् सहृदयचेतश्चुम्बति। अतएव कविरसौ जनप्रियः। प्रसादगुणोपेतं वैदर्भीरीतिविलसितं मधुरं सरसं श्लोकं विलोकयन्तु--

"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥"

रसयोजना--कालिदासः शृङ्गारी कविरस्ति। अस्य कवेरन्तर्दृष्टिः सौन्दर्यस्य कोमलां भावनां सम्यगभिजानाति। अस्य सौन्दर्यसृष्टिः शृङ्गारं सपुष्णाति। श्लोकाविमौ पश्यन्तु--

"पुष्पं प्रवालोपहितं यदि स्याद् मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद् विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य ॥
आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।
पर्याप्तपुष्पस्तबकावनम्रा सञ्चारिणी पल्लविनी लतेव ॥"

अस्य काव्येषु सम्भोगविप्रलम्भयोः समीचीनं सामञ्जस्यमस्ति। अस्य ललितशृङ्गाररसयोजना सहृदयान् प्रीणयति। सम्भोगशृङ्गारस्य निदर्शनभूतममुं श्लोकं विलोकयन्तु--

"किं शीतलैः क्लमविनोदिभिरार्द्रवातान्
सञ्चारयामि नलिनीदलतालवृन्तैः ।
अङ्के निधाय करभोरु यथासुखं ते
संवाहयामि चरणावुत पद्मताम्रौ ॥"

विप्रलम्भस्योदाहरणं पश्यन्तु--

"त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥"

अलङ्काराणां छटा--महाकविः कालिदासोऽलङ्कारप्रयोगे अनुपमां सफलतामलभत। मन्ये कालिदासस्य कविता कामिनी। यथा कश्चित् सहृदयः पुरुषः स्वकीयां कान्तां कामिनीं कमनीयैरलङ्कारैरलङ्करोति तथैव कालिदासोऽपि स्वकीयां कविताम्। अनुप्रास-यमक-श्लेष-उपमा-रूपक-उत्प्रेक्षा-स्वभावोक्तिप्रभृतयः तस्य प्रिया अलङ्काराः। उपमालङ्कारस्य तु असौ प्रतिनिधिः कविः। अस्य उपमासौन्दर्यं संवीक्ष्य प्रवदन्ति पण्डिताः-'उपमा कालिदासस्य'।

अस्य उपमायाः वैशिष्ट्यं विलोकयन्तु--

सञ्चारिणी दीपशिखेव रात्रौ,
यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः ।।

एतस्मादेव दीपशिखोपाधियुक्तः सञ्जातः कालिदासः । ललनाललामभूतां शकुन्तलां संवीक्ष्य कथयति राजा दुष्यन्तः-यदस्याः अधरः किसलयवद् रागः, बाहू कोमलशाखानुकारिणौ तथा यौवनपरिपूर्णशरीरं कुसुममिव कमनीयमस्ति--

"अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ।।"

कीदृशी कोमला, कान्ता, आकर्षका च उपमास्ति । यदि एकस्मिन् पक्षे कोमलकान्तपदावली, शृङ्गारमाधुर्यञ्च तदान्यत्र उपमायाः सौन्दर्यम् अनुपमां रसमाधुरीं सृजति । एवमेव यथावसरं छन्दसां रुचिरः प्रयोगो वर्त्तते ।

प्रकृतेर्नन्दन वनम्---महाकविकालिदासस्य प्रकृत्या सह घनिष्ठः सम्बन्धः तस्य काव्यारामे प्रकृतिनटी सर्वत्र नरीनृत्यते । प्रकृतिसुन्दरी स्वस्वाभाविकललितविलासैः स्पन्दते । अत्र प्रकृतेः मानवीकरणमस्ति । मानववत् प्रकृतिरपि सुखदुःखे अनुभवति । अत एवायं कविः स्वकाव्यानां पल्लवनं प्रकृतेः रुचिरक्रोडे एव तनुते । वसन्तवर्णनस्य श्लोकं विलोकयन्तु—

"रम्यः प्रदोषसमयः स्फुटचन्द्रभासः
पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः ।
मत्तालियूथविरुतं निशि सीधुपानं
सर्वं रसायनमिदं कुसुमायुधस्य ।।"

रघुवंशमहाकाव्येऽपि प्रकृतेरुदात्तं रूपं दृश्यते--

"क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव ।।
क्वचिच्च कृष्णोरगभूषणेव भस्मांगरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि विभाति गंगा भिन्नप्रवाहा यमुनातरङ्गैः ।।"

कुमारसम्भवस्य पार्वती तु प्रकृतेः मानवी कृतिरस्ति---

"अतन्द्रिता सा स्वयमेव वृक्षकान्घटस्तनप्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति ।।"

अभिज्ञानशाकुन्तले शकुन्तला प्रकृतिपुत्रीव विराजते । श्री शान्तिप्रियद्विवेदी लिखति-"शकुन्तला तदा प्रकृतिकन्या यदा सा शकुन्तात शकुन्तला । सा विहगबालिकाप्यस्ति वल्कलवसना तपोवनवासिनी आश्रमकन्यका चापि । संगीते यथा समस्तप्रकृतेः स्वरसमागमो जायते तथैव शकुन्तलायामपि प्रकृतिस्वारस्य समावेशो वर्तते, तस्मादेव

तु पादपान् सिञ्चन्ती शकुन्तला कथयति--'न केवलं तातनियोग एव, अस्ति मे सोदर-स्नेहोऽप्येतेषु' । प्रो० जी० सी० झाला लिखति--**Nature in the Shakuntala is not background, it has intered into the warp and woof of the drama... for withought nature, Shakuntala would be impossible."**

एवं कथयितुं शक्यते यत् कालिदासस्य काव्येषु तस्य कवितावनिता नैसर्गिकं लावण्यम्, स्वाभाविकं सरसत्वम्, अभिनवं तारुण्यम्, अकृत्रिमं माधुर्यम्, रुचिरं चारुत्वं च श्रयते । पश्यन्तु तावत् शकुन्तलायाः अनाघ्रातम् अनाविद्धम् अनास्वादितं ललितलावण्यम्--

"अनाघ्रातं पुष्पं किसलयमलूनं कररुहै--
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥"

कविरसौ व्यञ्जनाव्यापारे प्रशस्यतमः । शकुन्तलां विलोक्य आनन्दोत्फुल्ललोचनः सन् राजा दुष्यन्त एवमवादीत्--"अहो लब्धं नेत्रनिर्वाणम् ।" मन्ये शकुन्तलायाः दर्शनमेव कर्पूरम् । येन दर्शनेनैव नेत्रे शीतलतां लभेते । एवं कविरसौ कवितावनिताविलास एव । अस्य प्रशंसां कुर्वन् कथयति कश्चित् पण्डितः--

"पुष्पेषु चम्पा नगरीषु काञ्ची नदीषु गङ्गा नृपरेषु रामः ।
रामासु रम्भा पुरुषेषु विष्णुः काव्येषु माघः कविकालिदासः ॥"

अन्यच्च---

"माहिषं दधि सशर्करं पयः कालिदासकविता नवं वयः ।
शारदेन्दुरबला च कोमला स्वर्गशेषमुपभुञ्जते जनाः ॥"

------

४. भासो हासः

अथवा

**सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ॥**

प्रस्तावना--महाकविः भासः संस्कृतनाटकसाहित्यस्य सुप्रसिद्धः कविरस्ति । भासस्य नाटकैः प्रभाविताः सन्तः कवयः सादरं तं प्रशंसन्ति । कविताकामिनीविलासः कविकुलगुरुः कालिदासः एवं कथयति--'प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य कथं वर्तमानस्य कवेः कालिदासस्य कृतौ बहुमानः ।' महाकविः बाणभट्टोऽस्य विषये एवं ब्रूते--

'सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ॥'

कविराजः राजशेखरः स्वप्नवासवदत्ताख्यस्य तस्योत्कृष्टनाटकरत्नस्य वैशिष्ट्यं प्रतिपादयन्नेवं कथयति--

'भासनाटकचक्रेऽस्मिञ्छेकैः क्षिप्ते परीक्षितुम् ।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ॥"

कविपरिचयः --महाकविभासस्य स्थितिकालः प्रायेण विद्वांसः ई० पू० ५०० मन्यन्ते । अनेन नाटकेषु मनागपि स्वकीयः परिचयो न दर्शितः । अत एव बुधाः कल्पनया, अनुमानेन, नाटकानुशीलनेन च अस्य विषये एवं भणन्ति यद् महाकविः भासः कुलीनो ब्राह्मणः, व्रती, संयमी, अग्निहोत्री चासीत् । अयं कस्यापि राज्ञः सभापण्डितः आसीत् । भासः विविधविद्याविशारदः काव्यकलाकलापकुशलः हास्यप्रियश्चासीत् ।

भासस्य कृतित्वम्--महाकवेर्भासस्य त्रयोदश नाटकरत्नानि समुपलभ्यन्ते । एतेषां नाटकानां मध्ये भासस्य स्वप्नवासवदत्तं परमं प्रतिष्ठितं वर्तते । समासतो भासनाटकचक्रस्य एवं परिचयोऽस्ति---

१ **प्रतिज्ञायौगन्धरायणम्**--अस्मिन् नाटके चत्वारः अङ्काः सन्ति । अत्र राज्ञ उदयनस्य वासवदत्तया सह प्रणयः परिणयश्च वर्णितौ स्तः ।

२. **स्वप्नवासवदत्तम्**--अस्मिन् नाटके षड् अङ्काः वर्तन्ते । अत्र वासवदत्ता अग्नौ दग्धा यौगन्धरायण एवं प्रचारं करोति । वासवदत्तां पद्मावतीसमीपे न्यस्यति । तदनु पद्मावत्या सह उदयनस्य परिणयो जायते । अन्ते उदयनस्य राज्यावाप्तिः, वासवदत्तया सह समागमोऽपि च भवति ।

३. **ऊरुभङ्गम्**---अस्मिन् रूपके एक एव अङ्कः । अत्र पाञ्चालीपरिभवप्रतिक्रियार्थं महाबली भीमः सङ्गरे गदया दुर्योधनोरुभञ्जनं करोति, इत्येवं कथावस्तु वर्ण्यते ।

४. **दूतवाक्यम्**--अस्मिन्नपि रूपके एक एव अङ्कः । अत्र कृष्णः दूतत्वेन दुर्योधनं गच्छति । दुर्योधनः तस्य सन्धिप्रस्तावं न स्वीकरोति । तत्र भगवतः कृष्णस्य गमनं वैफल्यं भजते ।

५. **पञ्चरात्रम्**--अस्मिन् रूपके त्रयोऽङ्काः सन्ति । अत्र आचार्यो द्रोणो यज्ञावसाने दक्षिणास्वरूपं दुर्योधनं राज्यार्धं याचते । दुर्योधनोऽनेन पणेन द्रोणोक्तिं स्वीकरोति यत् पाण्डवाः पञ्चरात्राभ्यन्तरे अत्रागच्छन्तु नाम । द्रोणाचार्यः स्वीकरोति । पाण्डवानां दर्शनं जायते । दुर्योधनः तेभ्यो द्रोणोक्तिमनुस्मृत्य राज्यार्धं प्रयच्छति ।

६. **बालचरितम्**--अत्र पञ्च अङ्काः सन्ति । अस्मिन् रूपके भगवतः कृष्णस्य जन्मन आरभ्य कंसवधपर्यन्तं जीवनचरितं वर्णितमस्ति ।

७--**दूतघटोत्कचम्**-अत्र एकएव अङ्कः । अस्मिन् रूपके घटोत्कचो दूतत्वेन कृष्णसन्देशमादाय धृतराष्ट्रं प्रति गच्छति । दुर्योधनः तस्यापमानं करोति । दुर्योधनघटोत्कचयोः वाक्कलहः भवति । धृतराष्ट्रो घटोत्कचं शमयति ।

८. **कर्णभारम्**--नाटकमिदमेकाङ्कि वर्तते । अस्मिन् रूपके कर्णो विप्रवेषधारिणे शक्राय कवचकुण्डलदानं करोति ।

९. **मध्यमव्यायोगः**--अत्रापि एक एव अङ्कः । अस्मिन् व्यायोगे मध्यमः पाण्डवो

भीमो मध्यमब्राह्मणबालकं घटोत्कचात् त्रायते । सुतदर्शनेन भीमस्यानन्दप्राप्तिः हिडम्बया सहसमागमोऽपि जायते ।

१० **प्रतिमानाटकम्**--नाटकेऽस्मिन् सप्ताङ्काः सन्ति । अत्र रामवनवासादारभ्य रावणवधान्ता कथोपनिबद्धास्ति । अत्रायं विशेषो यद् दशरथप्रतिमां प्रेक्ष्य भरतोऽवगच्छति जनको दशरथो निधनं गतः ।

११. **अभिषेकनाटकम्**--अत्र षडङ्काः वर्तन्ते । अस्मिन्नाटके किष्किन्धाकाण्डादारभ्य युद्धकाण्डान्ता कथोपनिबद्धास्ति । रावणस्य वधानन्तरं रामस्य राज्याभिषेको भवति ।

१२. **अविमारकम्**--अत्र षडङ्काः वर्तन्ते । अत्र राजकुमारस्याविमारकस्य नृपस्य कुन्तिभोजाख्यस्य दुहित्रा कुरङ्ग्या सह प्रणयपरिणयो वर्णितोऽस्ति ।

१३. **चारुदत्तम्**--अत्र चत्वारोऽङ्काः सन्ति । अत्र चारुदत्तेन सह वसन्तसेनाभिधानगणिकया सह प्रणयपरिणयो वर्णितोऽस्ति ।

भासस्य नाटकानां प्रामाणिकता--एषां त्रयोदश नाटकानां प्रणेता भास एव, अन्यो वा कश्चित् कविरस्ति । बहवस्तावदेवमाहुः यदेतेषां सर्वेषां नाटकानां प्रणेता भासो नास्ति । परन्तु नाटकानामन्तःसाक्ष्यादिना ज्ञायते यदेतेषां नाटकानां रचयिता भास एव । तत्र प्रमाणम्–(१) सर्वेषु नाटकेषु 'नान्द्यन्ते ततः प्रविशति सूत्रधारः' इत्येवं वाक्यं वर्तते । (२) सर्वत्र प्रस्तावनास्थाने स्थापनाशब्दस्य प्रयोगो वर्तते । (३) स्थापनायां नाटकप्रणेतुः परिचयाभावोऽस्ति । (४) 'राजसिंहः प्रशास्तु नः' इत्येवं भरतवाक्यं सर्वत्र समानमेव । (५) नाटकेषु अपाणिनीयप्रयोगाः सन्ति । (६) सर्वेषु नाटकेषु भाषासाम्यं, रीतिसाम्यं, प्रसादगुणोपेतत्वं च । (७) पात्राणां कथोपकथनेऽपि समतास्ति । (८) अन्यान्यपि सामान्यसाम्यानि नाटकेषु विलसन्ति । एवं कथयितुं शक्यते यद् महाकविः भास एव त्रयोदश नाटकानां रचयिता ।

भासस्य नाट्यकला--महाकविर्भासो नाट्यकलायां पूर्णनिष्णातः । तस्य नाटकानामनुशीलनेन ज्ञायते तस्य रूपकनिर्माणचातुरी । तस्य नाटकरत्नानि विविधनाट्यकलाकलितानि ललितललितानि च सन्ति । नाटकानां बहुलता विषयाणां विविधता चास्य नाट्यनैपुण्यं तनुते । तत्रापि च भाषायाः सरलता, भावानां सरसता, स्वाभाविका शैली, हृद्यो निरवद्यो वाक्यविन्यासः, वर्णनप्रसङ्गेषु यथार्थता, चरित्रचित्रणे वैयक्तिकता, घटनासंयोजने संश्लिष्टता, वैदर्भीरीतिविलासः, सुभासरसहासः, प्रतीयमानं लावण्य, सहजं माधुर्यं च सम्यक् विलसति ।

भासस्य नाटकचक्रे सर्वत्र विचित्रा स्वाभाविकता । कथोपकथनानि तथा सन्ति यानि सहसैव प्रभावं कुर्वन्ति । पद्यानां प्रयोगोऽपि हृद्यः । सर्वाधिकविशिष्टता एषास्ति यद् भासनाटकचक्रे अनावश्यकः प्रपञ्चो नास्ति । एवमस्य नाटकानि सम्यग् नाट्यकलाविभूषितानि सन्ति । तत्र स्वप्नवासवदत्तं तु उत्कृष्टतममस्ति । अस्मिन् विषये राजशेखर एवमभिधत्ते—

"भासनाटकचक्रेऽस्मिञ्छेकैः क्षिप्ते परीक्षितुम् ।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ।।"

भासस्य रसाभिनिवेशः--नाटकेषु रसस्य स्थितिः परमं महत्त्वं श्रयते । रसास्वादनमेव नाटकानां परमं प्रयोजनम् । भासस्य नाटकेषु सर्वेषामेव रसानां व्यतिरेको विलसति । वासवदत्तावियोगेन उदयनस्य कीदृशी दशा जायते--यौगन्धरायणं प्रति कथयति ब्रह्मचारी--'ततः स राजा महीतलपरिसर्पणपांसुपाटलशरीरः सहसोत्थाय हा वासवदत्ते ! हा अवन्तिराजपुत्रि ! हा प्रिये ! हा प्रियशिष्ये ! इति किमपि बहु प्रलपितवान् । किं बहुना –

"नैवेदानीं तादृशाश्चक्रवाका नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः ।
धन्या सा स्त्री यां तथा वेत्ति भर्ता भर्तृस्नेहात् सा हि दग्धाऽप्यदग्धा ।।"

शृङ्गाररसस्य निदर्शनभूतमधोलिखितं श्लोकं पश्यन्तु--

"अद्यापि हस्तिकरशीकरशीतलाङ्गीं
बालां भयाकुलविलोलविषादनेत्राम् ।
स्वप्नेषु नित्यमुपलभ्य पुनर्विबोधे
जातस्मरः प्रथमजातिमिव स्मरामि ।।"

एवमेवान्येषां रसानां संयोजनमपि हृद्यं वर्तते ।

भासस्य भाषाशैली – भासस्य भाषाविलासः परमरमणीयः । अस्य भाषासुन्दरी सर्वत्रैव ललितललितैः कोमलकान्तपदैरलङ्कृता दरीदृश्यते । भाषा सरला, सरसा, सुबोधा स्वाभाविका, कमनीया चास्ति । एषा मन्ये नाट्यप्राङ्गणे मन्दस्मितेव राजते । तस्याः मञ्जुलं पदसौन्दर्यं संवीक्ष्य को न भुवि तरलायते ? को नाम परमानन्दानुभूतिं न समवाप्नोति ? परिभवविषण्णां वासवदत्तां यौगन्धरायण एवं कथयति–

"पूर्वं त्वयाप्यभिमतं गतमेवमासी-
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः ।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ।।"

एवमेव गद्यमपि परमरमणीयत्वं भजते–

"कुञ्जरिके ! कुञ्जरिके ! कुत्र कुत्र भर्तृदारिका पदमावती ? किं भणसि, एषा भर्तृदारिका माधवीलतामण्डपस्य पार्श्वतः कन्दुकेन क्रीडतीति । यावद् भर्तृदारिकामुपसर्पामि । अम्मो ! इयं भर्तृदारिका उत्कृतकर्णचूलिकेन व्यायाम–सञ्जातस्वेदबिन्दुविचित्रितेन परिश्रान्तरमणीयदर्शनेन मुखेन कन्दुकेन क्रीडन्तीत एवागच्छति । यावदुपसर्प्स्यामि ।"

प्रसादमाधुर्यगुणोपेता वैदर्भीरीतिविलसिता ललितशब्दसमुदायसिता कमनीयकाव्यकलाकलिता सरसा रुचिरा रचना वर्तते । माधुर्यगुणोपेतं श्लोकं पश्यन्तु--

मधुमदकला मधुकरा मदनार्ताभिः प्रियाभिरुपगूढाः ।
पादन्यासविषण्णा वयमिव कान्तावियुक्ताः स्युः ॥"

प्रसादवैदर्भीसमुपेतां कवेः कृतिं विलोकयन्तु—

श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां
कालक्रमेण पुनरागतदारभारः ।
लावाणके हुतवहेन हृताङ्गयष्टिं
तां पद्मिनीं हिमहतामिव चिन्तयामि ॥

तथा च—

"किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता सा ।
भाग्यैश्चलैर्महदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः ॥"

अस्य शैली रामायणमहाभारतादिग्रन्थैः प्रभाविताऽस्ति । अत एव भाषा सर्वत्र भावमनुसरति । भासनाटकचक्रे भावानामाभा सर्वथा मञ्जुलास्ति । भावभव्यतापरं सरलसरलं नाट्यसौन्दर्यसुधारसोपेतं निरवद्यं हृद्यं प्रसादप्रसन्नं वैदर्भीविलासिनीविहारारामं श्लोकं निभालयन्तु—

"कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते
दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः ।
तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं
पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः ॥"

एवं भावप्रधानाः सरसाः श्लोकाः भासस्य नाटकेषु क्रीडन्तः सुशोभन्ते । अस्य वाणी सूक्तिरिव चेतः प्रसादयति, सहृदयजनान् प्रमोदयति प्रीणयति च । दुरूहमपि भावं प्रभावशालिन्या शैल्या अनायासेनैव प्रकटीकरोति, तत्र कदाचिदपि भाषायाः प्रवाहो न प्रतिहतो भवति । पश्यन्तु तावत्—

सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः ।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम् ॥"

मानवमनोवृत्तिव्याख्याने भासः परमप्रवीणः । तस्य मनोवैज्ञानिकमन्वाख्यानं मनोज्ञमप्यस्ति । यथा—

दुःखं त्यक्तुं बद्धमूलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम् ।
यात्रा त्वेषा यद् विमुच्येह बाष्पं
प्राप्तानृण्या याति बुद्धिः प्रसादम् ॥

भासनाटकेषु प्रकृतिनटी—भासस्य नाटकेषु प्रकृतिसौन्दर्यं भृशं रमणीयमस्ति । तत्र सर्वत्र प्रकृतिनटी ललितललनेव परिभ्रमन्ती राजते । तपोवनस्य रुचिरं वर्णनमस्मिन् श्लोके पश्यतु—

"विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः ।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः ॥"

सायङ्कालस्य स्वाभाविकं दृश्यमत्र विलोकयन्तु—

खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम् ।
परिभ्रष्टो दूराद् रविरपि च सङ्क्षिप्तकिरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम् ॥

भासो हासः——भासस्य नाटकेषु हासस्य विलासः सरसः । भासस्य नाटकेषु वर्णनानि वैरस्यं न भजन्ते । तानि सर्वत्र स्वाभाविकतां श्रयन्ते । विदूषकोक्तिषु हासविलासः समवलोक्यते । विवाहावसरे सः तत्रत्यं वातावरणं एवं प्रस्तौति——

"भोः दिष्टचा तत्रभवतो वत्सराजस्याभिप्रेतविवाहमङ्गलरमणीयः कालो दृष्टः । भोः को नामैतज्जानाति——तादृशे वयमनर्थसलिलावर्ते प्रक्षिप्ताः पुनरुन्मङ्क्ष्याम इति । इदानीं प्रासादेषूष्यते, अन्तःपुरदीर्घिकासु स्नायते, प्रकृतिमधुरसुकुमाराणि मोदकखाद्यानि खाद्यन्त इत्यनप्सरस्संवास उत्तरकुरुवासो मयानुभूयते । एकः खलु महान् दोषः, ममाहारः सुष्ठु न परिणमति, सुप्रच्छदनायां शय्यायां निद्रां न लभे । यथा वातशोणितमभित इव वर्तत इति पश्यामि । भोः सुखं नामयपरिभूतमकल्यवर्तं च ।"

यदा विदूषको भणति यद् भोजनं वर्जयित्वा सर्वमानय तदा चेटी पृच्छति भोजनं तावत् किं निमित्तं वारयसि । विदूषकः कथयति——'अधन्यस्य मम कोकिलानामक्षिपरिवर्त इव कुक्षिपरिवर्तः संवृत्तः ।' निद्राभिभूतो महाराज उदयनः कथयति यद् वयस्य सम्प्रति निद्रा मां बाधते तत् कथ्यतां काचित् कथा । विदूषको वदति अहं कथयिष्यामि श्रीमान् होमिति करोतु । राजा स्वीकरोति, विदूषकः कथयति——'अस्ति नगरं ब्रह्मदत्तं नाम तत्र किल राजा काम्पिल्यो नाम ।' राजा कथयति किमिति किमिति भणसि पुनरपि विदूषकस्तथैव पठति । इत्यादिप्रसङ्गेषु भासस्य हासकला समवलोक्यते ।

भासनाटकचक्रे भारतीयता——भासो भारतीयभावानां चित्रणे कुशलः । तस्य नाटकेषु भारतीयभावाः सर्वत्र विलसन्ति । मातृभक्तिः, पितृपूजा, पातिव्रत्यम्, भ्रातृप्रेम, साधुसेवा, सज्जनसंसर्गः, क्षमाशीलता, गुरुशुश्रूषा—इत्यादयो विलोक्यन्ते । पातिव्रत्यविषये निम्नलिखितं श्लोकं विलोकयन्तु——

'अनुचरति शशाङ्कं राहुदोषेऽपि तारा
पतति च वनवृक्षे याति भूमिं लता च ।
त्यजति न च करेणुः पङ्कलग्नं गजेन्द्रं
व्रजतु चरतु धर्मं भर्तृनाथा हि नार्यः ॥'

आश्रमस्थतपस्विजनान् प्रति पद्मावतीप्रेरितः काञ्चुकीय एवमुद्घोषयति—

'कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं
दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत् ।
आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया
यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम् ॥'

भासस्य नाटकेषु मानवजीवनस्य अनुभूताः व्यवहारा उपन्यस्ताः सन्ति । इदमेव कारणमस्ति यत् तदीयानि नाटकानि मानवानां कृते सम्यग् हितं सम्पादयन्ति । जगति न्यासरक्षणं कठिनम् । न्यासविषये कथयति भासः—

'सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः ।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम् ॥"

सरसता, सरलता स्वाभाविकता च भासस्य लोकप्रियतायाः कारणमस्ति । भाषायाः सरलता, सरसता च तत्र सम्यक् महत्त्वं भजते । नाटकेषु वैविध्यं वैचित्र्यं च लोकप्रियताया अपरं कारणम् ।

शूद्रकप्रभृतयो नाटककारः भासमनुचर्कराञ्चक्रुः । नाटकेषु तु भासस्य पर्याप्तः प्रभावः । तत्र भावसाम्यं संयोजनसादृश्यं च समवलोक्यते । शूद्रकः स्वप्रकरणस्य मृच्छकटिकस्य कृते भासस्य चारुदत्तमशिश्रियत् । महाकविभासस्य विषये सत्यमेवोक्तमस्ति—

"सुविभक्तमुखाद्यङ्गैर्व्यक्तलक्षणवृत्तिभिः ।
परेतोऽपि स्थितो भासः शरीरैरिव नाटकैः ॥"

------

५. महाकविर्भारविः

अथवा

भारवेरर्थगौरवम्

संस्कृतसाहित्याकाशरविः महाकविभारविरर्थगौरवाय लोके प्रख्यातोऽस्ति । अस्य एकैव कृतिः किरातार्जुनीयं नाम महाकाव्यमस्ति । अनया एकया रचनया एवायं लोके प्रसिद्धिम् अलभत । अस्य किरातार्जुनीयमहाकाव्यस्य स्थानं बृहत्त्रय्यामस्ति ।

भारवेर्वृत्तम्--महाकविभारवेः स्थितिकालविषये ६३४ ईसवीये वर्षे लिखितेन ऐहोल—(Aihole) शिलालेखेन ज्ञायते यदसौ षष्ठशताब्द्यां भारतवसुन्धराम् अलञ्चकार । रविकीर्तिना तत्र लिखितम्--

"येनायोजि नवेऽश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म ।
स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः ॥"

अवन्तिसुन्दरीकथामाश्रित्य कौशिकगोत्रीयोऽयमिति विपश्चितो वदन्ति । अस्य जनकस्य नाम नारायणस्वामी अग्रजश्च दामोदरामिध आसीत् । भारविः चास्योपाधिः । अयं किल दाक्षिणात्यः चालुक्यवंशीयनरेन्द्रस्य श्रीविष्णुवर्द्धनस्य च सभापण्डित आसीत् ।

महाकविः भारविः विविधविद्याविशारदः समस्तशास्त्रार्थतत्त्वज्ञश्चासीत् । वेद-

वेदाङ्गाध्यात्मनीतिधर्मार्थकाममोक्षमन्त्रयन्त्रतन्त्रदर्शनगीतिगद्यकथानाटककाव्यशास्त्रायुर्वेद—राजनीतिज्योतिषगणितफलितादिविषयाणाम् असौ पारदृश्वा ।

कृतित्वम्—अस्य महाकवेः किरातार्जुनीयाख्या एकैव कृतिरस्ति । अस्मिन् अष्टादश सर्गाः सन्ति । अस्य कथावस्तु महाभारताद् गृहीतमस्ति । तत्र इयं घटना समासेन वर्णितास्ति । परन्तु कविरसौ तां स्वकीयया विलक्षणकल्पनाशक्त्या प्रतिभया च महाकाव्यरूपेण प्रस्तौति । तस्य मौलिकविचारणा सर्वत्रैव दरीदृश्यते ।

पात्राणां चरित्रचित्रणे कविरसौ अनुपमेयः शिल्पी । युधिष्ठरभीमार्जुनादयः पुरातनाः सन्तोऽपि सर्वत्र नवीना इव विलोक्यन्ते । तत्र सर्वत्र नवनवाः विचारणाः कल्पनाः च वर्तन्ते । सङ्गरारिभीमो भीमः खलु ओजस्वी वक्ता, धर्मराजो युधिष्ठिरः सहनशीलतायाः प्रतिमूर्तिः, नायकोऽर्जुनः संयतः, धीरः, वीरः, गम्भीरः पुरुषरत्नः । एवं भारवेः पात्रेषु स्वाभाविकता, सजीवता, चारित्रिकदृढ़ता चावलोक्यते ।

रसाभिव्यञ्जनम्—किरातार्जुनीयमहाकाव्यस्य प्रधानरसो वीरोऽस्ति । वीररसाभिव्यञ्जने कविः परमं साफल्यं प्राप । द्रौपदीभीमार्जुनोक्तिभिः कविः वीररसाभिव्यञ्जनमकारयत् । भीमः कथयति—

"द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः ।
प्रसहेत रणं तवानुजान् द्विषतां कः शतमन्युतेजसः ।।"

अर्जुनस्य शौर्यं पश्यन्तु—

"उन्मज्जन्मकर इवामरापगाया वेगेन प्रतिमुखमेत्य बाणनद्याः ।
गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः ।।"

कवेः शृङ्गाररसयोजनापि मधुरा ललिता रुचिराद्वितीया च । शृङ्गाररसाप्लावितं श्लोकं विलोकयन्तु—

"लोलदृष्टिवदनं दयितायाश्चुम्बति प्रियतमे रभसेन ।
व्रीडया सह विनीविनितम्बादंशुकं शिथिलतामुपपेदे ।।"

प्रगल्भानायिकायाः रागपरवशता नारीजातिसुलभलज्जामपि अतिक्रामति । काचित् कामिनी प्रियतमं प्रति निबद्धदृष्टिरुन्मुखी सती शिथिलं स्वकीयमधोवसनं न समादधे, अत एव तस्य विचित्रा स्थितिः—

"प्रियेऽपरा यच्छति वाचमुन्मुखी निबद्धदृष्टिः शिथिला कुलोच्चया ।
समादधे नांशुकमाहितं वृथा विवेद पुष्पेषु न पाणिपल्लवम् ।।"

एवमेव अन्यान्यरसाभिव्यञ्जने कविरसौ साफल्यमधिजगाम ।

रचनाशैली—महाकविः भारवि संस्कृतसाहित्ये नवीनायाः शैल्याः प्रवर्तकः । रचनाशैलीविषये स स्वयमेव लिखति—

"स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ।।"

अस्यायमाशयोऽस्ति यत् काव्ये माधुर्यादिगुणसंयोजनेन पदानां स्फुटता (विशदता),

अर्थगौरवसंवित्तिः, पुनरुक्तिदोषाभावः, वर्णनानां क्रमबद्धता च अनिवार्या मता—

यद्यपि काव्यमार्गे नैकाः विप्रतिपत्तयः किं तत्र अर्थगौरवं स्यात्, उत् भावगाम्भीर्यम्, आहोस्वित् ललिता सरसा परिष्कृता पदावली, उताहो प्रौढो बन्धः ? एवं प्रतिपुरुषं रुचिवैचित्र्यात् विचारणीयः साधीयान् मार्गः—

"स्तुवन्ति गुर्वीमभिधेयसम्पदं विशुद्धिमुक्तेरपरे विपश्चितः ।
इति स्थितायां प्रतिपूरुषं रुचौ, सुदुर्लभा सर्वमनोरमा गिरः ।।"

प्राप्तिः प्राक्कृतपुण्यकर्मणां प्रसादेनैव भवति—

"विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम् ।
प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती ।।"

अगाधपाण्डित्यमात्रेणैव कश्चित् काव्यरचनां कर्तुं न प्रभवति । दैवीप्रतिभया, सतताभ्यासेन, उत्कटसाधनया एव कश्चित् सुकृती काव्यमार्गं सेवितुमर्हति तथा च सरलया शैल्या गम्भीरार्थस्य अभिव्यक्तिं तनोति । कथयति महाकविर्भारविः—

"भवन्ति ते सभ्यतमा विपश्चितां मनोगतं वाचि निवेशयन्ति ये ।
नयन्ति तेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित् प्रकाशताम् ।।"

एवमस्य रचनाशैली नूतना, मौलिकी, गुणालङ्काररसभावभरिता च । कवेः काव्यशैलीं निरूपयन्नाह कृष्णकविः —

"प्रदेशवृत्त्यापि महान्तमर्थं प्रदर्शयन्ती रसमादधाना ।
सा भारवेः सत्पथदीपिकेव रम्याकृतिः कैरिव नोपजीव्या ।।"

भाषासौष्ठवम्—महाकविभारवेः निर्मितिः नवीना, रुचिरा प्रौढा परिष्कृता च । अतएवास्य भाषायां माधुर्यस्य, लालित्यस्य, प्रौढत्वस्य च समीचीनोऽभिनवः समन्वयो विलोक्यते । कविरसौ भाषाविषयविशारदः । अतएव सर्वत्र भाषा भावमनुसरति । भावानुकूलया शब्दावल्या काव्यमार्गं तनुते । अस्य भाषासुन्दरी प्रसादगुणोपेता, कोमलकान्तपदसंयुक्ता, विविधैरलङ्कारैरलङ्कृता चास्ति—

"अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टम् ।
मनः प्रसादाञ्जलिना निकामं जग्राह पाथेयमिवेन्द्रसूनुः ।।"

अस्य भाषा यत्र-तत्र क्लिष्टत्वमपि भजते । यदासौ पाण्डित्यं प्रदर्शयति तदा क्लिष्टता आयाति एव । यथासौ एकस्मिन् श्लोके नकारव्यञ्जनस्य एव प्रयोगम् अचकारीत्—

"न नोननुन्नो नो नुन्नो नाना नानानना ननु ।
नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ।।

अर्थचतुष्टयसमन्वितः श्लोकः तस्य प्रज्ञाम् अभिव्यनक्ति—

"विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणा ।
विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणा ।।"

काव्ये सर्वतोभद्रविरचनं तस्यागाधपाण्डित्यं संसूचयति--

देवाकानिनि कावादे वाहिकास्वस्वकाहि वा ।
काकारेभभरे काका निस्वभव्यव्यभस्वनि ॥"

छन्दोऽलङ्काररामणीयकम्--महाकविभारवेः कवितावनिता विविधैरलङ्कारैरलङ्कृतास्ति । कविना शब्दार्थालङ्कारयोरुभयोः यथास्थानं प्रयोगो विहितः । शब्दालङ्कारेषु अनुप्रास-यमक-श्लेष-चित्रालङ्काराः प्रमुखाः । अर्थालङ्कारेषु उपमा-उत्प्रेक्षा-रूपक-निदर्शना-समासोक्ति-काव्यलिङ्ग-अर्थान्तरन्यास-अतिशयोक्ति-व्यतिरेक प्रभृतयः प्रमुखाः सन्ति । छन्दसां वैविध्यं वैचित्र्यं च सर्वथाह्लादकारि मनोहारि च । वंशस्थ-उपजाति-द्रुतविलम्बित-पुष्पिताग्रा-वसन्ततिलकादीनि प्रमुखच्छन्दांसि सहृदयानां चेतांसि चोरयन्ति । अस्य वंशस्थं प्रशंसन् महाकविः क्षेमेन्द्रो लिखति--

"वृत्तच्छत्रस्य सा कापि वंशस्थस्य विचित्रता ।
प्रतिभा भारवेर्येन सच्छायेनाधिकीकृता ॥"

भावगाम्भीर्यम्--महाकविभारविः विविधविद्यावारपारीणो वर्तते । सर्वशास्त्रेषु तस्यास्खलिता गतिः । समस्तशास्त्राणि तस्य काव्ये प्रतिबिम्बितानि सन्ति । अतएव तस्य काव्ये सर्वत्र गाम्भीर्यं विजृम्भते । तस्य काव्यार्थावबोधाय अनेकशास्त्राणां ज्ञानस्य अपेक्षा वर्तते । परिशुद्ध आगमो प्रदीप इवार्थदर्शने खलु प्रभवति--

"मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ॥"

सार्थकैः शब्दैः भावाः सहसैव परिस्फुरन्ति--

"संस्कारवत्त्वाद् रमयत्सु चेतः प्रयोगशिक्षागुणभूषणेषु ।
जयं यथार्थेषु शरेषु पार्थः शब्देषु भावार्थमिवाशशंसे ॥"

अर्थगौरवम्--महाकविभारवेरर्थगौरवमतितरां प्रथितमस्ति । कवेः नवनवोन्मेषशालिनी प्रज्ञा नैसर्गिकी प्रतिभा च सर्वत्र काव्योद्याने सततम् अभिनवम् अर्थमकरन्दं किरतः, यत्र सहृदयजनमनोमधुपः काव्यार्थमकरन्दम् आस्वादम् आस्वादम् परां निर्वृत्तिं लभमानो नरीनृत्यते । तस्य सूक्तयः संस्कृतसाहित्याकाशे विद्युदिव विद्योतमानाः विराजन्ते । तत्र सर्वत्र अर्थगाम्भीर्यं दरीदृश्यते । अत एव कोविदैरुद्घोषितम्--

'भारवेरर्थगौरवम् ।' अर्थगौरवविषये स स्वयमेव कथयति--

"परिणामसुखे गरीयसी व्यथकेऽस्मिन् वचसि क्षतौजसाम् ।
अतिवीर्यवतीव भेषजे, बहुरल्पीयसि दृश्यते गुणः ॥"

कार्यं सर्वदा विचार्यैव आचरणीयम्, अविमृश्यकारिता कार्यसिद्धिं विनाशयति-इत्येवं विषयं प्रतिपादयन् लिखति महाकविः--

"सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥"

शठे शाठ्यं समाचरेदिति नीतिमेवं प्रस्तौति--

"व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृतांगान् निशिता इवेषवः ॥"

मृदुत्वतीक्ष्णतयोः समन्वयेनैव कश्चित् साफल्यं प्राप्तुं शक्नोति । कमथति महाकविर्भारविः—

"समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम् ।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ॥"

महीयसः खल्वियं प्रकृतिरस्ति यत् सः कदाचिदपि अन्यसमुन्नतिं न सहते—

"किमपेक्ष्य फलं पयोधरान् ध्वनत प्रार्थयते मृगाधिप ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥"

अवन्ध्यकोपस्य पुरुषस्य जनाः स्वयमेव वश्याः भवन्ति--

"अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥"

कविरसौ गुणानां बहुधा प्रशंसां करोति –'गुरुतां नयन्ति हि गुणा संहतिः', 'सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम्', 'गुणाः प्रियत्वेऽधिकृता न संस्तवः' । राजनीतिविषये तु कविरसौ परमप्रवीणः । अस्मिन् विषये नैका सूक्तयो लभ्यन्ते–'हितं मनोहारि च दुर्लभं वचः', 'वरं विरोधोऽपि समं महात्मभिः', 'सुदुर्लभाः सर्वमनोरमा गिरः', 'नयहीनादपरज्यते जनः', 'ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः', 'कामाः कष्टा हि शत्रवः', 'परमं लाभमरातिभङ्गमाहुः', 'भवन्ति गोमायुसखा न दन्तिनः', विचित्ररूपाः खलु चित्तवृत्तयः', 'वसन्ति हि प्रेम्णि गुणा न वस्तुषु' ।

एवं महाकविभारवेः महाकाव्ये सर्वत्रैव 'अर्थगौरवम्' विराजते । अत एव कथयति कोलाचलमल्लिनाथसूरिः--

"नारिकेलफलसम्मितं वचो भारवेः सपदि तद्विभज्यते ।
खादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ॥"

------

६. महाकविमाघः

अथवा

माघे सन्ति त्रयो गुणाः

संस्कृतसाहित्यं परमं विशालं व्यापकं चास्ति । अत्र अनेके कवयो बभूवुः । तेषु व्यासभासकालिदासभवभूतिभारविमाघश्रीहर्षप्रभृतयः प्रमुखाः सन्ति । महाकविमाघकाव्ये अनेके गुणाः वर्तन्ते । कालिदासस्य उपमा, भारवेरर्थगौरवम्, दण्डिनः पदलालित्यं च प्रख्यातं वर्तते । परन्तु महाकविमाघे तु एते त्रयो गुणाः खलु लभ्यन्ते । अतएव कथितमस्ति काव्यकलाकोविदैः--

"उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥"

माघस्य जीवनवृत्तम्--महाकविमाघस्य जनको दत्तकसर्वाश्रयः आसीत् । अस्य पितामहः श्री सुप्रभदेववर्मलातनृपस्य मन्त्री आसीत् । शिशुपालवधस्याधोविन्यस्तश्लोके व्याकरणशास्त्रस्य ग्रन्थद्वयस्योल्लेखो वर्तते—

"अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना ।
शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥"

काशिकावृत्तेः रचनां वामनजयादित्यौ ६५० ईसवीये वर्षे चक्रतुः । एवं माघस्य स्थितिकालः सप्तमशताब्द्याः उत्तरार्द्धेऽवतिष्ठते ।

कृतित्वम्--महाकविमाघस्य एकमेव शिशुपालवधाख्यं महाकाव्यं समुपलभ्यते । महाकाव्यमिदं बृहत्त्रय्यां प्रतिष्ठितमस्ति । अस्मिन् महाकाव्ये विंशतिः सर्गाः, १६४५ श्लोकाः सन्ति । १५ सर्गे ३४ श्लोकाः प्रक्षिप्ताः, ५ श्लोकाः कविवंशवर्णनात्मकाः सन्ति एवं तेषामपि समाहारे १६८४ श्लोकसंख्या जायते । सूक्तिसंग्रहेषु महाकविमाघनाम्ना श्लोकाः लभ्यन्ते ये शिशुपालाख्ये महाकाव्ये न वर्तन्ते । येनानुमीयते यद् महाकविः माघोऽन्यान्यपि काव्यानि लिलेख यानि सम्प्रति नोपलभ्यन्ते । तस्य कतिपयश्लोकाः—

"बुभुक्षितैर्व्याकरणं न भुज्यते, पिपासितैः काव्यरसो न पीयते ।
न विद्यया केनचिदुद्धृतं कुलं हिरण्यमेवार्जय निष्फलाः कलाः ॥"

(औचित्यविचारचर्चा)

अर्थाः न सन्ति न च मुञ्चति मां दुराशा
त्यागान्न सकुचति दुर्ललितं मनो मे ।
याच्ञा च लाघवकरी स्ववधे च पापं
प्राणाः स्वयं व्रजत किं नु विलम्बितेन ॥

(सुभाषितरत्नभाण्डागारः)

नारीनितम्बफलके प्रतिबध्यमाना हंसीव हेमरशना मधुरं ररास ।
तन्मोचनार्थमिव नूपुरराजहंसा चक्रन्दुरार्त्तमुखरे चरणावलग्नाः ॥"

शिशुपालवधाख्यमहाकाव्यस्य कथा महाभारतस्य सभापर्वणि श्रीमद्भागवतस्य च दशमस्कन्धे प्राप्यते । ततः कथानकमवलम्ब्य कविरसौ नैसर्गिकप्रतिभया विलक्षणकल्पना-शक्त्या च शिशुपालवधमहाकाव्यं व्यरीरचत् ।

महाकविमाघस्य वैदुष्यम्-महाकविमाघस्य समये कविता-क्षेत्रे पाण्डित्यप्रदर्शन-प्रवृत्तिः पूर्णपल्लविताभूत् । अस्मिन् समये भावपक्षस्यापेक्षा कलापक्षस्य प्राधान्यमभवत् । अतएव कविरसौ कवित्वक्षेत्रे सर्वत्र पाण्डित्यं प्रदर्शयति । डॉ० व्यासो लिखति–'कालिदासो मूलतः कविरस्ति, भारविः राजनीतिशास्त्रस्य व्यावहारिको ज्ञाता, भट्टिः केवल वैयाकरणः, श्रीहर्षस्य पाण्डित्यं विशेषतो दर्शने, परन्तु माघस्य सर्वतन्त्रस्वतन्त्रपाण्डित्यम् अप्रतिममस्ति ।"

शिशुपालवधस्यानुशीलनेन ज्ञायते यत् महाकविमाघः वेदवेदाङ्गदर्शनपुराणेतिहासराजनीतिधर्मार्थकाममोक्षायुर्वेदसंगीतकाव्यनाट्यादिविषयेषु अनुपमेयः पारदृश्वा । अतएव बुधा उच्चैरुदघोषयन्–'मेघे माघे गतं वयः' तथा–'नवसर्गगते माघे नवशब्दो न विद्यते' ।

महाकविमाघस्य वस्तुचित्रणम्–महाकविमाघो वस्तुचित्रणे सिद्धहस्तः । अस्य वस्तुचित्रणे नवीनता, सरसता, मधुरता च विराजन्ते । शिशुपालस्य स्वरूपं शौर्यं च कविरेवमुल्लिलेख–

"स बाल आसीद वपुषा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ।
युवा कराक्रान्तमहीभृदुच्चकैरसंशयं सम्प्रति तेजसा रविः ॥"

कवेः रैवतकगिरिवर्णनं मनोहरं प्रतिभावैदुष्यजुष्टं चास्ति । रैवतकपर्वतस्य तुलनां वारणेन्द्रेण सह करोति–

"उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ॥"

माघस्य शैली–महाकविमाघः संस्कृतस्य प्रकाण्डपण्डितः । अस्य महाकाव्ये सर्वत्रैव पाण्डित्यं दरीदृश्यते । अस्य समये कलाप्रदर्शनमेव कवीनां चरमं लक्ष्यम् । कवयः चमत्कारप्रदर्शने चेष्टन्ते स्म । महाकविमाघे प्रतिभावैदुष्ययोः मणिकाञ्चनयोगः । अत एव कविरसौ चमत्कारकलायामपि परमं साफल्यं लेभे । यत्रास्य नैसर्गिकी प्रतिभा रुचिराः कल्पनाः प्रस्तौति मन्ये कविः तासां रक्षार्थं वैदुष्यरूपकवचं तनोति । अस्य काव्ये सामयिका गतिविधयः स्फुटरूपेण विराजन्ते, यासां तस्य काव्यकानने सम्यक् पल्लवनं विलोक्यते । यं काव्यमार्गं महर्षिः वाल्मीकिः कोमलमधुरश्लक्ष्णपदयोजनया ससर्ज, महाकविव्यासोऽपि यं परिवर्द्धय ररक्ष, कविकुलगुरुः कालिदासोऽपि तं परिष्कृत्य तत्र माधुर्यप्रसादयोरन्वितिमकरोत् । महाकविः भारविः ततो निवृत्य कृत्रिमं काव्यमार्गम् आशिश्रियत्, परन्तु महाकविमाघः कृत्रिमकाव्यव्यापारे परमं साफल्यम् अलभत । कविः गौडीपाञ्चालीरीतिप्रयोगे सिद्धहस्तः । अस्य वैदर्भीरीतिविन्यासोऽपि मधुरः श्लाघ्यश्च । ओजोगुणयुक्तं गौडीरीतिमहाऽम्बराऽम्बरितं श्लोकं विलोकयन्तु–

"अद्रीन्द्रकुञ्जचरकुञ्जरगण्डकाषसंक्रान्तदानपयसो वनपादपस्य ।
सेनागजेन मथितस्य निजप्रसूनैर्मम्ले यथागतमगामि कुलैरलीनाम् ।"

लाटीलालित्योपेतं माधुर्यगुणान्वितं पद्यं पश्यन्तु तावत्–

"मधुरया मधुबोधितमाधवी मधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥"

प्रसादगुणोपेतं वैदर्भीरीतिविभूषितं हृद्यं पद्यं पश्यन्तु–

"यां यां प्रिया प्रैक्षत कातराक्षी सा सा ह्रिया नम्रमुखी बभूव ।
निःशङ्कमन्याः सममाहितेर्ष्यास्तत्रान्तरे जघ्नुरमुं कटाक्षैः ॥"

भाषा—महाकविमाघस्य भाषा यथास्थानं परिष्कृता, सरसा, प्राञ्जला, प्रौढा, पाण्डित्यपूर्णा, उद्दामा, हृद्यानवद्या च। भाषायाः लावण्यं माधुर्यं गाम्भीर्यं च सर्वत्रैवोज्जृम्भते। अधोलिखितं श्लोकं विलोकयन्तु—

"विरोधिनां विग्रहभेददक्षा मूर्तेव शक्तिः क्वचिदस्खलन्ती।
नित्यं हरेः सन्निहिता निकामं कौमोदकी मोदयति स्म चेतः॥"

माघस्य ललितपदशय्यां शब्दशक्तिं च प्रशंसन् पं० चन्द्रशेखरपाण्डेयो लिखति—"पदानां ललितविन्यासस्तु निस्सन्देहं प्रशंसनीयः, माघस्य पदशय्या तथा रुचिरास्ति यत् कश्चिदपि शब्दः स्वस्थानाद् निराकर्तुं न शक्यते। ललितपदशय्यासमन्वितं रुचिरं श्लोकमवलोकयन्तु—

"नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत्स सुरभिं सुरभिं सुमनोभरैः॥"

भाषायां कवेरसाधारणाधिकारः। भाषा कवेर्भावानुगामिनीभूय भ्रमति। भाषावैभवविभूषितं श्लोकं पश्यन्तु—

"राजीवराजीवशलोलभृङ्गं मुष्णन्तमुष्णं ततिभिस्तरूणाम्।
कान्तालकान्ता ललनाः सुराणां रक्षोभिरक्षोभितमुद्वहन्तम्॥"

अस्य भाषायां नवीनाः शब्दाः सर्वत्रैव दरीदृश्यन्ते। शिशुपालवधस्याध्ययनेन पाठकोऽनेकनूतनशब्दैः सहसैव परिचयं कर्तुमर्हति। कविरसौ शतृप्रत्ययान्तशब्दानां लिट्लकारस्य च प्रयोगे परमप्रवीणः। निम्नलिखितान् शब्दान् पश्यन्तु—

"वसानम्, दधानम्, विडम्बयन्तम्, चकासतम्, विभान्तम्, जिगाय, विरेजिरे, बभूवतुः, सिषेविरे, चक्रिरे, चकार, चक्रे, प्रशशंस, निनाय, प्रपेदिरे, उवाह, अनुचकम्पिरे, भेजे, निर्ववौ, ययुः।"

रसाभिव्यञ्जनम्—शिशुपालवधमहाकाव्यस्य प्रधानरसो वीरोऽस्ति। अस्य रसस्याभिव्यञ्जने सः पूर्णं सफलतामधिजगाम। महाकाव्येऽस्मिन् प्रतिस्थानं श्रीकृष्णस्य उत्साहो दृश्यते। शिशुपालोऽत्रालम्बनविभावः। वीररसान्वितं पद्यं पश्यन्तु—

"आयन्तीनामविरतरयं राजकानीकिनीना—
मित्थं सैन्यैः सममलघुभिः श्रीपतेरूर्मिमद्भिः।
आसीदोघैर्मुहुरिव महद्वारिधेरापगानां
दोलायुद्धं कृतगुरुतरध्वानमौद्धत्यभाजाम्॥"

शृङ्गाररससंयोजनेऽपि कविः साफल्यं लेभे। नायिकानायिकावुदासीनावस्थितौ, नायकः त्वरया नायिकाया वसनमपाकर्षति, अतो नायिकाया वक्षःस्थलं निर्वस्त्रं जायते। नायकः तस्याः वक्षःस्थलं पश्येत्, अतः सा कामिनी स्वकीयं कुचमण्डलं नायकेन सह संयोजयति—

"उत्तरीयविनयात्त्रपमाणा रुन्धती किल तदीक्षणमार्गम्।
आवरिष्ट विकटेन विवोढुं वक्षसैव कुचमण्डलमन्या॥"

एवमेव कविः रौद्रबीभत्सहास्यशान्तादिरससंयोजनेऽपि सफलतां प्राप। शान्तरसस्याभिव्यञ्जनं पश्यन्तु—

"उदासितारं निगृहीतमानसै—
गृहीतमध्यात्मदृशा कथञ्चन।
बहिर्विकारं प्रकृतेः पृथग्विदुः
पुरातनं त्वां पुरुषं पुराविदः॥"

छन्दोऽलङ्कारदीधितिः—महाकविमाघस्य शैली अलंकारप्रधानास्ति। शिशुपालबधमहाकाव्ये अलङ्कारचमत्कारः सर्वत्रावलोक्यते। अस्यालङ्कारविधाने प्रो० शिवबालकद्विवेदी लिखति—"कविरसौ शब्दार्थालङ्कारौ भृशं प्रयुयोज। कुत्रचित्तु एकस्मिञ्छ्लोके नैकेऽलङ्काराः प्रयुक्ताः सन्ति। महाकाव्ये यत्र-तत्र तु अलङ्कारप्रयोगजटिलता कविताबनितायाः सौन्दर्यमपाकरोति। चित्रालङ्काराणां विचित्रता दृढ़ता प्रचुरता च कवितासौन्दर्यं जहाति।" समुच्चयालङ्कारस्य मनोहारि रूपं पश्यन्तु—

"पुरीमवस्कन्द लुनीहि नन्दन मुषाण रत्नानि हरामराङ्गनाः।
विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः॥"

छन्दसां प्रयोगेऽपि कविरसौ कुशलः। यथास्थानं छन्दसां विनियोगो वर्तते।

प्रकृतिचित्रणम्—शिशुपालवधे पाण्डित्ये सत्यपि प्रकृतेः सुकुमारता अक्षुण्णास्ति। रैवतकपर्वतः तु प्रकृतिनट्याः सुसज्जितं प्राङ्गणं वर्तते। पश्यन्तु तावत्—

"विलम्बिनीलोत्पलकर्णपूराः कपोलभित्तीरिव लोध्रगौरीः।
नवालपालंकृतसैकताभाः शुचीरपः शैवलिनीर्दधानम्॥"

प्रकृतिमाध्यमेन चिरन्तनं सत्यं समुद्घाटयन् लिखति महाकविः माघः—

"समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम्।
शरदि हंसरवाः परुषीकृतस्वरमयूरमयू रमणीयताम्॥"

माघे सन्ति त्रयो गुणाः—महाकविकालिदासस्य उपमा प्रसिद्धास्ति। अर्थगौरवस्य विषये भारविरेव ज्यायान्। दण्डिनः पदलालित्यं लोके प्रख्यातमस्ति। परन्तु महाकविमाघेः एते त्रयो गुणाः समवलोक्यन्ते।

१—**उपमा**—महाकविकालिदासः उपमालङ्कारस्य सम्राट्। अलौकिकोपम्यविधानकारणात् कालिदासो दीपशिखाकालिदासो जातः। महाकविमाघोऽपि कालिदास इव उपमाप्रयोगप्रवीणः। पश्यन्तु तावत्—

"उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम्।
तनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः॥"

शास्त्रीयोपमा—"अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।
शब्दविद्येव नो भाति राजनीतिरपस्पशा॥"

नारदश्रीकृष्णयोः सितासिते शोभे तथैव शुशुभाते यथा निशि पत्रान्तरगोचराः सुधांशोः शुभ्रांशवः—

"रथाङ्गपाणेः पटलेन रोचिषाम् ऋषित्विषः संवलिता विरेजिरे ।
चलत्पलाशान्तरगोचरास्तरोस्तुषरमूर्तेरिव नक्तमंशवः ॥"

कवेर्मनोज्ञा कल्पनानुपमा । कथयति कविः—यथा स्वल्पवयस्का सुता मातरम् अनुसरति, तथैव पूर्वसन्ध्या क्षपाम् अनुगच्छति—

"अनुपतति विरावैः पत्रिणां व्याहरन्ती ।
रजनिमचिरजाता पूर्वसन्ध्या सुतेव ॥"

२—अर्थगौरवम्—महाकविमाघविरर्थगौरवाय प्रख्यातोऽस्ति । माघेऽपि अर्थगाम्भीर्यगौरवं दरीदृश्यते । यद्यपि शिशुपालवधे प्रतिपदमर्थगौरवं विलोक्यते, तथापि द्वितीयः सर्गस्तु सर्वातिशायी । जगति मनस्विता सर्वोत्कृष्टा यत्र सा नास्ति तत्र मन्ये किञ्चिदपि नास्ति । मनस्वितायाः स्वाभिमानस्य च गौरवं निरूपयन्नेवं लिखति कविः—

"पादाहतं यदुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥"
'सदाभिमानैकधना हि मानिनः ।'

विधौ प्रतिकूलतामुपगते बहुसाधनतापि विफलतां याति—

"प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥"

सांख्यदर्शनप्रतिपादितं पुरुषस्वरूपं कविः श्रीकृष्णवर्णने एवं निर्दिशति—

"उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथञ्चन ।
बहिर्विकारं प्रकृतेः पृथग् विदुः पुरातनं त्वां पुरुषं पुराविदः ॥"

रामणीयकलक्षणं स एवं लिखति—

"क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।"

एवमेव शिशुपालवधेऽर्थगौरववन्तो नैके श्लोकाः विलोक्यन्ते ।

३—पदलालित्यम्—पदलालित्यविषये महाकविदण्डी परां प्रसिद्धिमलभत । माघस्यापि पदलालित्य हृद्यम् । शिशुपालवधे पदे-पदे पदलालित्यं विराजते । वर्णमाधुर्यम्, पदलालित्यम्, भाषासौन्दर्यमिति सर्वमेतत् खलु पदलालित्यं समेधयति । यमकालंकारालंकृतं पदलालित्यमस्मिन् पद्ये पश्यन्तु—

"नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्, स सुरभिं सुरभिं सुमनोभरैः ॥"

भाषायाः संगीतमाधुर्यमत्र विलोकयन्तु—

"मधुरया मधुबोधितमाधवी—मधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥"

पदानां रुचिरं सौकुमार्यमस्मिञ्छ्लोकेऽवलोकयन्तु—

"वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया ।
चलितया विदधे कलमेखला-कलकलोऽलकलोलदृशाऽन्यया ॥"

एवं गुणत्रयेऽपि महाकविमाघो महीयान् ।

७. श्रीहर्षः

अथवा

नैषधं विद्वदौषधम्

प्रस्तावना–प्रायः काव्यमार्गे वैदुष्यं लालित्यं च नैकत्र समुपलभ्येते। परन्तु महाकविः श्रीहर्षस्तु अस्य अपवादः। श्रीहर्षस्तु अनयोरुभयोः विषये पूर्णतां प्राप। अस्य कवेः कवितावनिता ललिता, रुचिरा मनोज्ञा चास्ति। संस्कृतसाहित्याकाशे अयं खलु कौमुदीमनोज्ञः सुधांशुरिव सुशोभते। श्रीहर्षस्तु कविताकामिनीहर्षोऽस्तीति महाकवि-जयदेवविमर्शः–

"यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः।
हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः
केषां नैषा कथय कविताकामिनीकौतुकाय॥"

श्रीहर्षस्य जीवनवृत्तं कृतित्वं च––अस्य महाकवेः जनकः श्रीहीरः जननी च मामल्लदेवी। असौ स्वकीये विषये स्वयमेव नैषधीयचरिते लिखति–

"श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः॥"

कविरयं कान्यकुब्जेश्वरस्य जयचन्द्रस्य सभायाः प्रतिष्ठितो मनीषी। यथा च स्वयमेव नैषधीयचरिते कथयति कविः–

"ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्॥"

अतोऽस्य स्थितिकालः द्वादशशताब्द्या उत्तरार्द्धः स्वीक्रियते बुधैः।

अस्य कवेः नव रचनाः सन्ति प्रसिद्धाः। ताश्च—(१) नैषधीयचरितम्, (२) स्थैर्यविचारप्रकरणम्, (३) विजयप्रशस्तिः, (४) खण्डनखण्डखाद्यम्, (५) गौडोर्वीशकुलप्रशस्तिः, (६) अर्णववर्णनम्, (७) छिन्दप्रशस्तिः, (८) शिवशक्तिसिद्धिः, (९) नवसाहसाङ्कचरितञ्च। नैषधीयचरितम् अस्य उत्कृष्टतमं ग्रन्थरत्नं वर्तते। अस्य महाकाव्यस्य रसास्वादनं सहृदयजनाः एव कर्तुमर्हन्ति न तु रसास्वादनविमुखाः। तरुणी–रमणीलावण्यं सचेतसो यून एव चेतः चोरयति न तु किशोराणाम्–

"यथा यूनस्तद्वत् परमरमणीयापि रमणी,
कुमाराणामन्तः करणहरणं नैव कुरुते।
मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः
किमस्या नाम स्यादरसपुरुषानादरभरैः॥"

श्रीहर्षस्य रसाभिनिवेशः–अस्य महाकवेः रसाभिनिवेशः सर्वथा श्लाघ्यः। अस्य कवितावनिता सर्वत्रैव काव्योपवने मधुरां सुधारसधारां क्षरति। शृंगारसुधारसाप्लावित कवेः कविताकामिनीं प्राप्य कोऽपि सहृदयः परमानन्दसन्दोहं श्रयितुं शक्नोति। शृङ्गार-

रसमाश्रित्य अस्य कविताकान्ता शनैः-शनैः सविलासं विलसति । मन्ये सर्वत्रैव काव्ये श्रृङ्गाररसमन्दाकिनी प्रवहति । यत्रावगाह्य जनाः परां निर्वृतिं खलु गच्छन्ति । अत्र विप्रलम्भसम्भोगयोरुभयोः सौन्दर्यसामञ्जस्यं विलसति । विप्रलम्भस्यैकं निदर्शनं पश्यन्तु-

"ज्वलति मन्मथवेदनया निजे
हृदि तयार्द्रमृणाललतार्पिता ।
स्वजयिनोस्त्रपया सविधस्थयो-
र्मलिनतामभजद् भुजयोर्भृशम् ॥"

संयोगश्रृंगारस्योदाहरणं विलोकयन्तु-

"मीलन्न शेकेऽभिमुखागताभ्यां
धर्तुं निपीड्य स्तनसान्तराभ्याम् ।
स्वाङ्गान्यपेतो विजगौ स पश्चात्
पुमङ्गसङ्गोत्पुलके पुनस्ते ॥"

नलस्य रमणीयं लावण्यं का कम्रस्तनी न कामयते ? अतएव कथयति-कविः--

"न का निशि स्वप्नगतं ददर्श तं
जगाद गोत्रस्खलिते च का न तम् ।
तदात्मताध्यातधवा रते च का
चकार वा न स्वमनोभवोद्भवम् ॥"

कवेः भाषाविलासः-अस्य कवेः भाषासुन्दरीविलासः परमरमणीयः । अस्य भाषा सर्वत्रैव ललितललितैः कोमलकान्तपदैरलंकृता दरीदृश्यते । तस्याः मञ्जुलं पदसौन्दर्यं संवीक्ष्य को न भुवि तरलायते ? एषा खलु मन्दस्मितेव राजते । हंसः श्रमाम्भःकण-भूषिताङ्गीं दमयन्तीं प्रति एवं कीरवन्मानुषवागवादीत्-

"अये ! कियद्यावदुपैषि दूरं व्यर्थं परिश्राम्यसि वा किमर्थम् ।
उदेति ते भीरपि किन्नु बाले विलोकयन्त्या न घना वनालीः ?
धार्यः कथङ्कारमहं भवत्या वियद्विहारी वसुधैकगत्या ।
अहो शिशुत्वं तव खण्डितं न स्मरस्य सख्या वयसाऽप्यनेन ॥"

महाराजं नलं प्रति स्वकीयामासक्तिं प्रकटयन्ती एवं भणति तत्रभवती दमयन्ती-

"इतीरिता पत्ररथेन तेन ह्रीणा च हृष्टा च बभाण भैमी ।
चेतो नलं कामयते मदीयं नान्यत्र कुत्रापि च साभिलाषम् ॥"

अस्य कवेः प्रसादमाधुर्यगुणोपेता वैदर्भीरीतिसंवलिता सरसा रचना रुचिरा वर्तते । वैदर्भीरीतिविषये कविः स्वयमेव कथयति-

"धन्यासि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥"

प्रसादगुणवैदर्भीरीतिसमुपेतं सरसं श्लोकं विलोकयन्तु-

"निशा शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः ।
विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय ॥"

नैषधे पदलालित्यम्-नैषधे पदलालित्यं तु विलोकनीयं वर्तते । कविः प्रसादमाधुर्यगुणाभ्यां सह सर्वथाद्भुतं पदलालित्यं प्रस्तौति । कवेः ललितपदसयोजना परमश्लाघ्या । स्थाने-स्थाने काव्यस्य लयात्मकत्वं संगीतात्मकत्वं च श्रोत्रसुखकरत्वेनावतिष्ठते । नवीना, रुचिरा, मञ्जुला, कमनीया, रमणीया, हृद्यानवद्या पदशय्या पाठकानां चेतांसि चोरयति । कतिपयानि हृद्यान्युदाहरणान्यत्र प्रस्तूयन्ते-

"अधारि पद्मेषु तदङ्घ्रिणा घृणा
क्व तच्छयच्छायलवोऽपि पल्लवे ।
तदास्यदास्येऽपि गतोऽधिकारितां
न शारदः पार्विकशर्वरीश्वरः ॥
रोमावलीदण्डनितम्बचक्रे
गुणञ्च लावण्यजलञ्च बाला ।
तारुण्यमूर्त्तेः कुचकुम्भकर्तु-
र्बिभर्ति शङ्के सहकारिचक्रम् ॥

नैषधं विद्वदौषधम्-महाकविः श्रीहर्षः विविधविद्याविशारदः कलाकलापाकलनकुशलश्च । अतएव स्वकीये नैषधीयचरिते महाकविः व्याकरणसांख्ययोगन्यायवैशेषिकवेदान्तमीमांसाचार्वाकबौद्धजैनादिदर्शनानां दुर्बोधान् सिद्धान्तान् वैदिकपौराणिकान् च कथाप्रसङ्गान् यत्र तत्र सश्रद्धं वर्णयति । यद्यपि नैषधीयचरितं ललितं काव्यमस्ति तथापि पाण्डित्यप्रदर्शनस्य प्रवृत्तिकारणाद् यत्र तत्र काव्यकानने कठिनप्रसङ्गजन्तवः तस्य चारुतां रमणीयतां कोमलतां च विनाशयन्ति (जहति) ।

पाणिनेः 'अपवर्गे तृतीया' इत्यस्मिन् सूत्रे व्यङ्ग्यं कुर्वन् कथयति कविः यद् मोक्षविषये (अपवर्गविषये) 'तृतीया' प्रकृतिः स्त्रीपुंसातिरिक्ताः क्लीबप्रकृतिरेव-

उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मनः ।
अपवर्गे तृतीयेति भणतः पाणिनेरपि ॥

गोतमाभिमतस्य मोक्षस्य समालोचनां कुर्वन् भणति यद् न्यायाभिमतो मोक्षो गोतमस्यैव मूर्खतमस्यैव मत श्रयितुं शक्नोति-

'मुक्तये यः शिलात्वाय, शास्त्रमूचे सचेतसाम् ।
गोतमं तमवेक्ष्यैव यथा वित्थ तथैव सः ॥'

वैशेषिकदर्शने उलूकापरपर्यायं कणादं प्रति व्यङ्ग्यं कुर्वन् एवं कथयति यद् उलूक एव तमस्तत्त्वपरीक्षणे क्षमः-

'ध्वान्तस्य वामोरु विचारणायां
वैशेषिकं चारु मतं मतं मे ।
औलूकमाहुः खलु दर्शनं तत्
क्षमं तमस्तत्त्वनिरूपणाय ॥'

एवमेव अन्यशास्त्रसिद्धान्तविज्ञानविषये कविना तत्र-तत्र साधीयसी मीमांसा कृतास्ति । सरस्वत्याः स्वरूपवर्णनावसरे एकस्मिन्नेव श्लोके बौद्धदर्शनस्य शाखात्रय-सिद्धान्ताः शून्यवादविज्ञानवादसाकारविज्ञानवादाः प्रतिपादिताः सन्ति—

"या सोमसिद्धान्तमयाननेव
शून्यात्मतावादमयोदरेव ।
विज्ञानसामस्त्यमयान्तरेव
साकारतासिद्धिमयाखिलेव ।।

एवमेव नैषधीयचरिते विविधव्याकरणदर्शनकाव्यकलाराद्धान्ता इतस्ततः प्रकीर्णाः समुपलभ्यन्ते ।

कल्पनाकामनीयकम्—नैषधीयचरिते सर्वत्र कवेः कल्पनाचारुत्वं विभाति । मन्ये काव्योपवने रुचिरा विविधहासविलासविलसिता तारुण्यपूर्णा शोभना सौन्दर्यसुधासन्दोहसंवलिता कल्पनाकामिनी मन्दस्मितेव राजते या खलु अभिनवैः रुचिरविलासैः मन्दहासैश्च सहृदयचेतांसि सहसैव चोरयति ।

महाराजस्य नलस्य ओजसः यशसश्च वैशिष्ट्यं प्रतिपादयन् कविः कथयति यत् तस्य तेजसः यशसः च स्थितौ सत्तायाम् इमौ भानुविधू निरर्थकौ इति यदा यदा मनसि कुरुते तदा तदा परिधिव्याजात् सूर्यस्य चन्द्रस्य च कुण्डलनां (अतिरिक्तासूचकवेष्टनम्) कुरुते—

"तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा ।
तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि ।।"

निषधेश्वरं नलं संवीक्ष्य, तस्य अप्रतिमं लावण्यं च दृष्ट्वा तत्र रन्तुमुत्कण्ठिताः ललनाः श्रियाहमस्य योग्या इति स्वमीक्षितुं करेषु दर्पणं जगृहुः परन्तु नैषधस्य समक्षे ताः विद्युत्प्रकाशे दीपप्रकाशवत्यः सत्यः सर्वथा हीना अत एव दमयन्तीं विहाय ताभिः दर्पणाः श्वासमलीमसाः कृताः—

"श्रियास्य योग्याहमिति स्वमीक्षितुं
करे तमालोक्य सुरूपया धृतः ।
विहाय भैमीमपदर्पया कया
न दर्पणः श्वासमलीमसः कृतः ।।"

नलकूबरस्याभिधानेनैव रम्भा तं भेजे तत्र कारणं प्रतिपादयन् कथयति कविः सा रम्भा राज्ञो नलस्य अनुपमं सौन्दर्यमस्मत् श्रोत्रसुधां विधाय तत्रानुरक्ता, परन्तु तमनवाप्य नलनामगन्धात् नलकूबरं भेजे--

"अस्मत्किल श्रोत्रसुधां विधाय
रम्भा चिरं भामतुलां नलस्य ।
तत्रानुरक्ता तमनाप्य भेजे
तन्नामगन्धान्नलकूबरं सा ।।"

दमयन्तीमृदुलकुचवर्णनावसरे कवेः कल्पनां विलोकयन्तु—

"किं नर्मदाया मम सेयमस्या
दृश्याऽभितो बाहुलता मृणाली।
कुचौ किमुत्तस्थतुरन्तरीपे
स्मरोष्मशुष्यत्तरबाल्यवारः ॥"

नलं संवीक्ष्य दमयन्ती एवं ब्रूते—

"न मन्मथस्त्वं स हि नास्तिमूर्ति-
र्न वाश्विनेयः स हि नाद्वितीयः।
चिह्नैः किमन्यैरथवा तवेयं
श्रीरेव ताभ्यामधिको विशेषः ॥"

उदिते नैषधे काव्ये क्व माघः क्व च भारविः—संस्कृतसाहित्ये प्रसिद्धमस्ति यद् उपमाविषये कालिदासः, अर्थगौरवविषये भारविः, पदलालित्यविषये दण्डी एव ज्यायान् परन्तु माघे तु एते त्रयो गुणाः विलसन्ति—

"उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥"

परन्तु श्रीहर्षस्य काव्यसमक्षे भारविमाघौ द्वावेव निष्प्रभतां भजतः। अत एव बुधैः सादरं कथितमस्ति—'उदिते नैषधे काव्ये क्व माघः क्व च भारविः'। श्रीहर्षस्य कविताकामिनी सरसा, रुचिरा, मधुरा, विविधकलाविदग्धा, अनेकविलाससंवलिता च राजते। तत्र पदानां मधुरता, भवानां गम्भीरता, भाषायाः सुन्दरता, कल्पनायाः विचित्रता, रसानां रमणीयता, वैदर्भीरीतिप्रीतिः, अलङ्काराणां छटा च साधु संशोभतेतराम्।

सौन्दर्यप्रियता—कविः स्वभावतः सौन्दर्यप्रेमी वर्तते। तस्य पात्रेषु प्रतिपदं ललितलावण्यं प्रेक्षितुं शक्यते। तस्य सौन्दर्यसुधारसोपेता कलाप्रधाना स्वाभाविका हृद्या च। नलाननस्य प्रतिमा चराचरे नास्ति इत्येवं प्रतिपादयन् कथयति कविः—

"सरोरुहं तस्य दृशैव तर्जितं
जिताः स्मितेनैव विधोरपि श्रियः।
कुतः परं भव्यमहो महीयसी
तदाननस्योपमितौ दरिद्रता ॥"

हंसगतेः तस्याः सुदत्याः पुरः पुरः चारु चलन् हंसः बभासे—

"हंसोऽप्यसौ हंसगतेस्सुदत्याः
पुरः पुरश्चारु चलन् बभासे।
वैलक्ष्यहेतोर्गतिमेतदीया-
मग्रेऽनुकृत्योपहसन्निवोच्चैः ॥"

अन्तःपुरसुन्दरीभिः संघट्टितः राजा नलः सम्भुक्तकल्पः बभूव, तत्रत्यं सौन्दर्यं विलोकयन्तु—

"हत: कयाचित्पथि कन्दुकेन
संघट्य भिन्न: करजै: कयापि ।
कयाचनाक्त: कुचकुङ्कुमेन
संभुक्तकल्प स बभूव ताभि: ॥"

दमयन्त्या: जगद्विलक्षणं रूपं वर्णयन्नाह कवि:--

"पदे विधातुर्यदि मन्मथो वा ममाभिषिच्येत मनोरथो वा ।
तदा घटेतापि न वा तदेतत्प्रतिप्रतीकाद्‌भुतरूपशिल्पम् ॥
अस्यां वपुर्व्यूहविधानविद्यां किं द्योतयामास नवामवाप्ताम् ।
प्रत्यङ्गसङ्गस्फुटलब्धभूमा लावण्यसीमा यदिमामुपास्ते ॥"

दमयन्त्या: स्मितसौन्दर्यमस्मिन् श्लोके पश्यन्तु--

"यदि प्रसादीकुरुते सुधांशो-
रेषा सहस्रांशमपि स्मितस्य ।
तत्कौमुदीनां कुरुते तमेव
निमित्त्य देव: सफलं स जन्म ॥"

दमयन्त्या: कोमलताविषये कविरेवं कथयति--

"शिरीषकोशादपि कोमलाया
वेधा विधायाङ्गमशेषमस्या: ।
प्राप्तप्रकर्ष: सुकुमारसर्गे
समापयद्वाचि मृदुत्वमुद्राम् ॥"

इयमेकैव दमयन्ती दृष्टा सती अनेकासामप्सरसां प्रेक्षणकौतुकानि पूरयति--

"भ्रूश्चित्ररेखा च तिलोत्तमास्या
नासा च रम्भा च यदूरुसृष्टि: ।
दृष्टा तत: पूरयतीयमेका
नेकाप्सर: प्रेक्षणकौतुकानि ॥"

एवं वयं कथयितुमर्हाम: यद् नैषधीयचरितं महाकाव्यं परमं रामणीयकं भजते । बुधा: खल्वस्य मधुररसं पायं पायं सुधामपि न तथा आद्रियन्ते ।

८— भवभूति:

अथवा

कारुण्यं भवभूतिरेव तनुते

अथवा

उत्तरे रामचरिते भवभूतिर्विशिष्यते

प्रस्तावना—महानुभूति: विश्वविभूति: कविताकामिनीभूति: महाकवि: भवभूति: संस्कृतनाटकसाहित्याकाशस्य भास्वरो भगवान् भास्करो वर्तते । अयं कवि: संस्कृतकविषु

महतीं प्रतिष्ठां लेभे। 'काव्येषु नाटकं रम्यम्' इति तु सुप्रसिद्धमेव। आनन्दनिष्यन्दिषु रूपकेषु विषये एषा भणितिरपि प्रसिद्धा वर्तते—

"न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
न स योगो न तत्कर्म नाटके यन्न दृश्यते॥"

अग्निपुराणेऽप्युक्तम्-'त्रिवर्गसाधनं नाट्यम्'।

इदमेव कारणमस्ति यदयं कविः आनन्दनिष्यन्दिषु रूपकेष्वेव प्रवृत्तोऽभूत् तत्र च सम्यक् साफल्यमाप। संस्कृतकवितावनिताविलासः भवभूतिःप्रभूतभूतिविभूतिं लब्ध्वा परमं लावण्यम् अभजत्।

भवभूतेः जीवनपरिचयः कृतित्वं च—भवभूतेः स्थितिकालः प्रायः सप्तमशतके स्वीक्रियते। अस्य निवासस्थानं विदर्भप्रदेशस्य पद्मपुरं नाम नगरमासीत्। अस्य पितामहः भट्टगोपालः, पिता नीलकण्ठः, जननी जतुकर्णी, गुरुः ज्ञाननिधिश्चास्ति। अयं खलु कश्यपगोत्रोत्पन्नः श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणज्ञः भवभूतिः। सम्प्रति अस्य नाटकत्रयमुपलभ्यते—(१) मालतीमाधवम्, (२) महावीरचरितम्, (३) उत्तररामचरितं च। अस्याभिधानं 'श्रीकण्ठ' आसीत्–एवं प्रायो विद्वांसो मन्यन्ते। परन्तु भवभूतिपदप्रयोगस्य चमत्कारेण तं बुधाः भवभूतिरिति नाम्ना जगदुः। तत्प्रयोगश्चाधस्तने पद्ये—

"तपस्वी कां गतोऽवस्थामिति स्मेराननाविव।
गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ॥"

सम्प्रति अयं भवभूतिरिति नामधेयेन प्रसिद्धोऽस्ति। उत्तररामचरितं तु अस्य कवेः सर्वोत्कृष्टं नाटकरत्नमस्ति।

भवभूतेः रसाभिनिवेशः—रसः एव कवितावनितालासविलासो वर्तते। रसहीना सती सा सौन्दर्यं जहाति। रसविलासेन च सहृदयानां चेतांसि चोरयति। अतएव कथयति कविराजो विश्वनाथः—

'वाक्यं रसात्मकं काव्यम्।'

रससंयोजने अयं कविः परमं साफल्यमाप। अस्य रसाभिनिवेशः सर्वत्र श्लाघ्यः। शृङ्गारकरुणवीरहास्यवात्सल्यप्रभृतिषु रसेषु अस्य श्लाघ्या प्रवृत्तिः। शृङ्गाररसे संयोगविप्रलम्भयोरुभयोः वैशिष्ट्यं विलसति। संयोगशृङ्गारस्य शोभां विलोकयन्तु—

(तथा कारयन्सानन्दम्) प्रिये! किमेतत्?
विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा,
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणः
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च॥"

तथा च—

"म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि॥"

विप्रलम्भपक्षे सीतायाः स्वरूपं विलोकयन्तु—

"परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी ॥"

सीताविरहवारीशनिमग्नः रामः एवं कथयति—'अयि चण्डि जानकि ! इतस्ततो दृश्यसे, नानुकम्पसे'—

"हा हा देवि ! स्फुटति हृदयं, ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥"

कारुण्यं भवभूतिरेव तनुते—करुणरसविमर्शे महाकविर्भवभूतिरप्रतिमः । सीतारामयोः करुणा त मर्यादामप्यतिशेते । कारुण्यमनुभवन् भणति रामः—

"वेलोल्लोलक्षुभितकरुणोज्जृम्भणस्तम्भनार्थं
यो यो यत्नः कथमपि समाधीयते तं तमन्तः ।
हित्वा भित्त्वा प्रसरति बलात्कोऽपि चेतोविकार-
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः ॥"

भवभूतिकृतकारुण्ये ग्रावा अपि रोदिति कुलिशस्यापि हृदयं दलति—

"अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥"

करुणस्य प्राधान्यं प्रतिपादयन् भणति भवभूतिः यत् करुणादन्ये रसा अस्यैव विवर्तरूपेण परिणामरूपेण परिणमन्ते, न च तेषां पृथक् सत्ता । बुधाः करुणस्य व्याख्यां करुणविप्रलम्भरूपेण कुर्वन्ति करुणमहत्त्वविषये कथयति कविः—

"एको रसः करुण एव निमित्तभेदाद्
भिन्नः पृथक् पृथगिव श्रयते विवर्तान् ।
आवर्तबुद्बुदतरङ्गमयान् विकारान्
अम्भो यथा सलिलमेव हि तत्समस्तम् ॥"

कवेः भाषासुन्दरीविलासः—अस्य कवेः भाषासुन्दरी ललितललितैः चटुलकुटिलशब्दकुन्तलैः प्रपाददशनकुसुमैः मुग्धालोकं मुख सम्मुखं करोति । सा च दर्शनेनैव ललनाललामेव मधुरमधुरैः मञ्जुलैः ललितविलाससुधारसाप्लावितैः पदविन्यासैः सहृदयानां हृदयानि हरति । अत एव ते तां विहाय अन्यत्र गन्तुं मनागपि मनसि नेहन्ते । माधुर्यगुणकलितं लाटीसमुट्टङ्कितम् अनवद्यपदोद्योतविद्योतितमधोविन्यस्तं पद्यम्—

"प्रतनुविरलैः प्रान्तोन्मीलनमनोहरकुन्तलै-
र्दशनकुसुमैर्मुग्धालोकं शिशुर्दधती मुखम् ।
ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-
रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः ॥"

आसादितप्रसादानुरणितं वैदर्भीसमुपबृंहित चेदं पद्यमत्रमनोहरणमुदाहरणम्—

"अयि कठोर यशः किल ते प्रियं
किमयशो ननु घोरमतः परम् ।
किमभवद् विपिने हरिणीदृशः
कथय नाथ कथं बत मन्यसे ॥"

एवमेव ओजोराजिविराजितं गौडीमहाडम्बरडम्बरितं समीर्यतेऽनवद्यं पद्यम्—

"पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै—
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः ।
कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरभिस्तीर्यते
लीनाम्भोदतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव ॥"

एवं कथयितुं शक्यते यत् कवेः भाषासुन्दरी सरसा, ललिता, मधुरा, प्रसादादिगुणोपेता, विविधहावभावविभूषिता सर्वत्र काव्योद्याने मन्दस्मितेव राजते । सा सततं भावमनुसरति । सा संश्लिष्टा, व्यवस्थिता, प्रफुल्ला चास्ति । तस्याः रमणीयतां पश्यन्तु—

"त्वं जीवितं, त्वमसि मे हृदयं, द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे ।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमतः परेण ॥"

अलङ्काररामणीयकम्—कवेः कवितावनिता विविधैः शब्दार्थालङ्कारैरलङ्कृता वर्तते । सर्वत्र सुप्रयुक्ताः अलङ्काराः कविताकामिनीं साधु अलङ्कुर्वन्ति । येन तस्याः मन्दस्मिते विलासलावण्यस्य लालित्यं वृद्धित्वमाप्नोति (वर्धते) । एतत्कवितायाम् अलङ्काराणां स्वाभाविकता, रमणीयता चारुता च परमहृद्यास्ति । उपमायाः सौन्दर्यमस्मिन् श्लोके विलोकयन्तु—

"अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥"

प्रकृतेर्नन्दनं वनम्—कवेर्प्रकृतिसुन्दरी कवितासुन्दर्या सह विचित्रं सामञ्जस्यं भजते । तदाकाराकारिता कविता स्वाभाविकं सौन्दर्यं श्रयते । कवेः काव्यकानने प्रकृतिनटी तन्वङ्गी ललनेव परिभ्रमन्ती राजते । अत्र प्रकृतिरेव पात्रत्वं प्राप्य व्यवहरति मोदते च । रामः द्रुमहरिणान् बन्धुरूपेण निर्दिश्य एवं कथयति—

"यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रियासहचरश्चिरमध्यवात्सम् ।
एतानि तानि बहुकन्दरनिर्झराणि
गोदावरीपरिसरस्य गिरेस्तटानि ॥"

लोकाभिरामस्य श्रीरामस्य अभिनन्दनार्थं वासन्ती वनपवनद्विजतरून् प्रति एवं भणति—

"ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः ।
कलमविरलं रज्यत्कण्ठाः क्वणन्तु शकुन्तयः
पुनरिदमयं देवो रामः स्वयं वनमागतः ॥"

प्रीतिस्वरूपम्--भवभूतिमतेन प्रेम खल्वनिर्वचनीयमस्ति । स्नेहः कारणं नापेक्षते । अत एव कथयति कविः-'स्नेहश्च निमित्तसव्यपेक्ष' इति विप्रतिषिद्धमेतत् । तस्य एषा भणितिः--प्रीतयः बहिरुपाधीन् न खलु भजन्ते । कोऽपि आन्तरः हेतुरेव पदार्थान् व्यतिषजति--

"व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥"

प्रियजनः न किञ्चिदपि कुर्वाणः सौख्यैः दुःखानि निराकरोति--

"न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥"

यः खलु अहेतुः पक्षपातो वर्तते तस्य प्रतिकारो न वर्तते यतो हि सः प्रेममयः तन्तुरन्तर्भूतानि सीव्यति । भवभूतेरय भावः यत् "प्रसवः खलु प्रकृष्टपर्यन्तः स्नेहस्य । परं चैतदन्योन्यसंश्लेषणं पित्रोः--

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते ॥"

दाम्पत्यप्रेम आन्तरिकवृत्ति भजते, तत्र हृदयं परमां विश्रान्तिमवाप्नोति, यस्मिन् प्रीतिरजरामरा सती जरसापि न हार्या । कथयति कविः--

"अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु य-
द्विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ॥"

एवमनेकवैशिष्ट्यविलसितः विविधनाट्यकाव्यकलाकलापालापलपनकुशलः पद-वाक्यप्रमाणज्ञः महाकविः भवभूतिः 'उत्तररामचरिते' नाट्यकलाविषये परां कोटिमाटीकते । तदुक्तं कोविदैः--

'उत्तरे रामचरिते भवभूतिर्विशिष्यते ।'

तस्य कारुण्यविषये गोवर्धनाचार्यः एवं कथयति--

'भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति ।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥"

उत्तररामचरितस्य तृतीयाङ्कवैशिष्ट्यविषये ब्रूते शिवबालकः—

"भवभूतेस्तु सर्वस्वमुत्तरं चरितं मतम् ।
तत्रापि च तृतीयोऽङ्कः तत्र श्लोकचतुष्टयम् ॥"

९— बाणोच्छिष्टं जगत्सर्वम्

अथवा

वाणी बाणो बभूव ह

संस्कृतगद्यम्—संस्कृतसाहित्ये पद्यरचनायाः प्राचुर्यं वर्तते । अत्र पद्यापेक्षा गद्यस्य विरलतास्ति । अस्य कारणमिदमस्ति यत् कश्चिदपि कवि स्वल्पेनैव कौशलेन पद्यं निर्मातुं प्रभवति, तेन च यशोऽधिगच्छति । परन्तु गद्यनिर्माणे तादृशी स्थितिर्नास्ति । यतो हि पठने तत्र न गायनरीतिः । अतएव गद्यनिर्माणं कठिनमेव । 'गद्यं कवीनां निकषं वदन्ति' इति विदुषामभितं सर्वथा समीचीनम् । अयमेव हेतुरस्ति यत् संस्कृतसाहित्ये गद्यकाव्यप्रणेतारः कवयो विरला एव ।

बाणस्य जीवनवृत्तम्—महाकविबाणभट्टस्तु गद्यसाहित्यस्य सम्राट एवास्ति । अस्य कृतिषु भावकलापक्षयोरुभयोः सामञ्जस्यं विद्यते । अस्य महाकवेर्जनिकालस्य विषये वंशादिविषये च काचन विप्रतिपत्तिर्नास्ति । अस्य स्थितिकालः सप्तमशताब्द्याः पूर्वार्द्धो वर्तते । हर्षचरितस्यादौ कविरसौ स्ववंशादिपरिचयं सविस्तरमुल्लिलेख । अस्य जनकः चित्रभानुः जननी च राजदेवी । सम्राजो हर्षस्यायं सभापण्डितः । एकया किंवदन्त्यायं मयूरस्य समकालिकः प्रतीयते । अनयायं मयूरस्य जामातासीत् । एकदा प्रातःकाले मयूरो बाणवेश्म ययौ । तदा बाणस्य जाया रुष्टा स्थितासीत् । बाणस्तामेवं प्रासादयत्—

गतप्राया रात्रिः कृशतनु शशी शीर्यत इव
प्रदीपोऽयं निद्रावशमुपगतो घूर्णत इव ।
प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो,

परन्तु बहुधा प्रयतमानोऽपि श्लोकस्य चतुर्थं चरणं रचयितुं न शेके । मयूरकविः सहसा तृतीयं चरणमेव व्यरीरचत्—

'कुचप्रत्यासत्त्या हृदयमपि ते चण्डि कठिनम् ।'

अनेन क्रुद्धो बाणो मयूरमशपत । मयूरोऽपि बाणमशपत । शापनिवृत्त्यर्थं मयूरः सूर्यशतकमरचयत् बाणोऽपि च चण्डीशतकम् ।

कृतित्वम्—हर्षचरितं कादम्बरी चेति बाणस्य प्रख्याते कृती । आभ्यामेव असौ परमां प्रसिद्धिं प्राप । अस्य अन्याः कृतयः— १—चण्डीशतकम्, २—पार्वतीपरिणयम्, ३—मुकुटताडितकम्, ४—पद्यकादम्बरी च सन्ति । अत्र बाणस्य कादम्बरी सर्वोत्कृष्टा जगति प्रतिष्ठिता च ।

बाणस्य गद्यशैली—संस्कृतसाहित्ये यथा पद्यरचनायां कविकुलगुरुः कालिदासोऽनुपमेयस्तथैव गद्यरचनायां कविराजराजिमुकुटालङ्कारो बाणभट्टोऽप्यद्वितीयः । महाकविः सुबन्धुः यां कृत्रिमगद्यशैलीं प्रारभत, तस्याः प्रौढं सुस्निग्धं च

स्वरूपं बाणस्य गद्यशैल्यामवलोक्यते । यद्यपि कविरयं सुबन्धुमार्गानुयायी तथापि भावाभिव्यक्तेः रुचिरता, शैल्याः विशदता च कविममुं कालिदासभवभूतिसमक्षं प्रस्तौति । अस्य विषये प्रसिद्धिरस्ति—'बाणोच्छिष्टं जगत्सर्वम् ।' अस्यायमाशयोऽस्ति यद् बाणभट्टानन्तरं कश्चिदपि कविः कमपि नवीनं विषयं नालिखत् । अतः समस्तं साहित्यं बाणस्य उच्छिष्टमात्रमेव ।

महाकविबाणस्य शैल्याः वैशिष्ट्यमिदमस्ति यत् तस्य रचनायां नापि केवलं श्लेषः, न वा अर्थचमत्कारः, नापि च अलङ्काराणामेव शोभा विराजते प्रत्युत तत्र भावकलापक्ष-योरुभयोः समुचितो विनियोगो लभ्यते । अतएव स्वयमेव बाणभट्ट आदर्शगद्यशैलीं व्यवारीत्—

"नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः ।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम् ।।"

अयम्भावो यद् विषयस्य नवीनता, रुचिरा हृद्या च स्वभावोक्तिः, सरलः प्रसन्नश्च श्लेषः स्फुटा रसाभिव्यक्तिः, विकटाक्षरबन्धता च सर्वत्र न सुलभाः । परन्तु बाणभट्टस्याऽयमेवादर्शः । तस्य गद्ये अर्थगौरवं, रुचिरा स्वभावोक्तिः, सरसः रसपरिपाकः, ओजोगुण-गुम्फितं शब्दसंयोजनं च वरीवर्ति । बाणस्य वर्णनशैली हृद्यानवद्या, मधुरा, कोमला, प्रौढा, गुणान्विता, रसप्रधाना, अलंकृता चास्ति । कादम्बरी विविधगुणगणैरलङ्कृता वर्तते, अतएव कथितमस्ति—"कादम्बरीरसज्ञानामाहारोऽपि न रोचते ।" बाणस्य गद्ययोजनाविषये लिखति प्रो० शिवबालकद्विवेदी—"बाणस्य गद्यरचनाविधाने सर्वाधिकं नौतन्यम्, सरलस्वाभाविकश्लेषगर्भाद्भुतयोजना, वस्तूनां यथार्थम् अग्राम्यं च चित्रणम्, समासबहुलपदविन्यासः, कथावस्तुग्रन्थनं चैतेषां विलक्षणं सामञ्जस्यम् अवलोक्यते ।"

बाणस्य वर्णनशक्तिरेतावती व्यापकाद्भुता चास्ति यत्तत्र अन्यः कश्चित् ततोऽधिकं लेखितुं न प्रभवति । साहित्यिकसौन्दर्यदृष्ट्या कविरसौ समेषां रसालङ्काराणां प्रयोगमतानीत् । महाश्वेतावर्णनावसरे कवेः कल्पनाविभूतिम् उत्प्रेक्षन्तां प्रेक्षावन्तः—

"शुक्लपक्षपरम्परामिव पुञ्जीकृतां, शंखादिवोत्कीर्णां, मृणालैरिव विरचितावयवां, दन्तितनुरिव घटितां, इन्दुकरकूर्चकैरिव प्रक्षालितां, अमृतफेनपिण्डैरिव पाण्डुरीकृताम् ।"

बाणभट्टस्य गद्यं पद्यमिव आह्लादकं मनोहरं चन्दनं चास्ति । अस्य गद्ये कविताववनितायाः ललितं लावण्यम्, रुचिरः रसाभिनिवेशः, मधुरो विभ्रमविलासः, पद्य-मिव लयात्मकता च चकास्ति ।

अस्य गद्यप्रासादप्राङ्गणे पाञ्चालीरीतिः लावण्यविलासोपेतनवनटीव सर्वत्र नरीनृत्यते । अस्य गद्यशैली स्वाभाविकतां श्रयते । यदि कविः पम्पासरोवरं कोमलकान्त-पदैः वर्णयति तदा विन्ध्याटवीं कठोरश्रुतिकटुपदैः । यथा—

"उत्फुल्लकुमुदकुवलयकह्लारम्, अनेकजलचरपतङ्गशतसञ्चलच्चलितवाचाल-वीचिमालम् ।"—पम्पासरोवर्णनम् ।

"क्वचित् प्रलयवेलेव महावराहदंष्ट्रासमुत्खातधरणिमण्डला, क्वचिद्दशमुखनगरीव चटुलवानरवृन्दसज्यमानतुङ्गशालाकुला, क्वचिदुन्मत्तमृगपतिनादभीतेव कण्टकिता ।"

अस्य वर्णनेषु भाषा यथास्थानं स्वस्वरूपं प्राचीकटत् । मन्ये, कविरसौ शब्दकोषस्य सर्वेषां शब्दानां समाप्तिमकरोत् । अतएव सरलशब्दानाम् अभावादसौ अप्रसिद्धकठिनतरशब्दान् प्रयुनक्ति । अतएव पाश्चात्यविपश्चिदोऽस्यालोचनामकुर्वन् । परन्तु बाणस्य गद्यशैली सर्वत्र प्रौढा कठिना च नास्ति । कवेर्गद्यं लालित्यपूर्णं यथास्थानं मधुरं सरसं स्वाभाविकं गम्भीरं प्रौढं कठिनं च वरीवर्ति । तद् अनेकस्थलेषु सरलं सुबोधं चास्ति । पश्यन्तु—"प्रसर तात ! भाव किं विलम्बसे ? त्वङ्गति तुरङ्गमः । भद्र, भग्नचरण संचरसि यावदमी पुरःसराः सरभसमुपरि पतन्ति । वाहयसि किमुष्ट्रम् ? न, पश्यसि निर्दय, निःशूकशिशुशयानम् ।"

भाषासौन्दर्यम्—महाकविबाणभट्टस्य भाषासुन्दरी मधुरा, रुचिरा, प्रौढ़ा, रमणीया चास्ति । अत एवेयं सर्वमनोमोहिनी, सर्वचित्ताकर्षिका च । सुसंबद्धालङ्कारैरलंकृतेयं मन्दस्मिता सती राजते । अच्छोदसरोवरवर्णनावसरे भाषायाः स्वच्छत्वं पश्यन्तु—

"तस्य तरुखण्डस्य मध्यभागे मणिदर्पणमिव त्रैलोक्यलक्ष्म्याः,··· ········ कैलासमिव द्रवतामापन्नम्, चन्द्रातपमिव रसतामुपेतम्, हराट्टहासमिव जलीभूतम्··· ··· अतिमनोरमच्छोदं नाम सरो दृष्टवान् ।"

महाश्वेतावर्णने एकावलीमूलकं मनोहरं चित्रं विलोकयन्तु—

"क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन, नवयौवनेन पदम् ।"

शुकनासोपदेशे प्रसादगुणोपेतं मृदु रुचिरं कोमलं गद्यं पश्यन्तु—

"न परिचयं रक्षति, नाभिजनमीक्षते, न रूपमालोकयते, न कुलक्रममनुवर्तते, न शीलं पश्यति, न वैदग्ध्यं गणयति, न श्रुतमाकर्णयति ।"

एवं तथ्यमेवास्ति—'बाणोच्छिष्टं जगत्सर्वम्' ।

रसाभिव्यञ्जनम्—कादम्बरी शृङ्गाररसप्रधाना कृतिरस्ति । अत्र जन्मजन्मान्तरसञ्चितसंस्काराणां जन्मान्तरसौहृदस्य स्वाभाविकं सजीवं च चित्रणं कृतमस्ति । लिखति एस० के० डे महोदयः—"बाणस्य प्रियतायाः मुख्यं मूल्यं कथावर्णने, चरित्रचित्रणे तथा चालंकारिकयोजनोपस्थापने नास्ति अपितु कवित्वे रसाभिव्यञ्जने चास्ति ।" तस्य कथा अभिनवा वधूरिव स्फुरत्कलालापविलासकोमला सती स्वयमेव रसेन शय्यामभ्युपागता सहृदयहृदि आनन्दातिरेकं तनोति—

"स्फुरत्कलालापविलासकोमला करोति रागं हृदि कौतुकाधिकम् ।
रसेन शय्यां स्वयमभ्युपागता कथा जनस्याभिनवा वधूरिव ।।"

कादम्बर्यां सम्भोगविप्रलम्भयोरुभयोः समीचीनं संयोजनम् । चन्द्रापीडस्य प्रथमदर्शने एव कादम्बरीहृदयं कामदेवः पस्पर्श । मुग्धायाः स्वेष्वङ्गेषु लक्षितानां तत्तत्सात्त्विकभावानां गोपने चातुर्यम् आलोचयन्तु—

"कुसुमायुध एव स्वेदमजनयत्, ससम्भ्रमोत्थानश्रमो व्यपदेशोऽभवत् । उरुकम्प

एव गतिं रुरोध, नूपुररवाकृष्टहंसमण्डलममशो लेभे । .... अन्तःप्रविष्टचन्द्रापीडस्पर्शलोभेनैव निग्धात हृदये हस्तः, स एव करः स्तनावरणव्याजो बभूव । .... मदनशरप्रथमप्रहारवेदनैव सीत्कारमकरोत्, कुसुमप्रकरकेतकीकण्टकक्षतिः साधारणतामगात् ।"

महाश्वेताविलापः कादम्बरीविरहोत्कण्ठा च करुणविप्रलम्भस्य सफलं चित्रणम् । उत्कण्ठितायाः कादम्बर्याः भावान् निभालयन्तु—

"अथ सा यथादर्शनमागत्यागत्य चन्द्रापीडगमनमावेदयन्तं परिजनमुत्तरलतारकेण विलोक्य, 'कथय किं सत्यमागतो दृष्टस्त्वया ? "कियत्यध्वनि क्वासौ' इति प्रतिमुखं निक्षिप्तनामाक्षरं पप्रच्छ । प्रवर्धमानधवलिम्ना चक्षुषा दृष्ट्वा च सम्मुखमापतन्तं तं दूरादेव वरारोहा, नवग्रहा, करिणीवोरुस्तम्भविधूता, विचेष्टमानाङ्गी, कुसुमशयनपरिमलोपगतैः परवशामुखरैर्मधुकरकुलैरिवाच्छाद्यमाना, सम्भ्रमच्युतोत्तरीयका हारकिरणानुरसि कर्तुमिच्छन्ती, मणिकुट्टिमनिहितेन वामकरतलेन हस्तावलम्बनं निजप्रतिमामिव याचमाना, स्रस्तकेशकलापसंयमनश्रमितेन गलत्स्वेदसलिलेन दक्षिणकरेण समभ्युक्ष्येवात्मानमर्पयन्ती .... ।"

सौन्दर्यचित्रणम्—सौन्दर्यसंयोजने बाणभट्टः परमं साफल्यमधिजगाम । मानवीयसौन्दर्यस्यासौ सफलचित्रकारः । रूपचित्रणे कवेः कल्पना सर्वत्रैव प्रस्फुटीभवति । कादम्बर्याः सौन्दर्यसंयोजनं पश्यन्तु--

"इन्दुमूर्तिमिवोद्दामभन्मथविलासगृहीतगुरुकलत्राम् ....मयूरावलीमिव नितम्बचुम्बिशिखण्डभारविस्फुटच्चन्द्रकान्ताम्, कल्पतरुलतामिव कामफलप्रदाम् ।

नखशिखसौन्दर्यसंयोजनेऽपि कविरसौऽनुपमेयः । कादम्बरीनखशिखसौन्दर्यस्य कल्पनाकलितं ललितं चित्रं पश्यन्तु--

"प्रजापतिदृढनिष्पीडितमध्यभागगलितं जघनशिलातलप्रतिघाताल्लावण्यस्रोत इव द्विधागतमूरुद्वयं दधानम्, ... उन्नतकुचान्तरितमुखदर्शनदुःखेनैव क्षीयमाणमध्यभागम् .... ।"

प्रकृतिचित्रणम्—बाणभट्टस्य गद्यारामे प्रकृतिसुन्दरी सर्वत्र नटति । अस्य प्रकृतिसुन्दरी स्वभाविकं विलासं भजते । अत्र कठोरकोमलयोरुभयोरपि संस्थितिः । यदि कविरेकत्र विन्ध्याटवीं वर्णयति तदा सोऽन्यत्र अच्छोदसरोवरस्य मधुरमृदुकमनीयतां च न विस्मरति ।

बाणप्रशस्तिः—महाकविबाणगद्यगौरवप्रभाविता नैके कवयस्तं प्रशशंसुः--

"जाता शिखण्डिनी प्राक् यथा शिखण्डी तथावगच्छामि ।
प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूवेति ॥"
"रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति ।
तत्किं तरुणी ? नहि नहि वाणी बाणस्य मधुरशीलस्य ॥"

अन्यच्च--

'श्लेषे केचन शब्दगुम्फविषये केचिद्रसे चापरे-
ऽलंकारे कतिचित्सदर्थविषये चान्ये कथावर्णने ।
आ सर्वत्र गभीरधीरकविताविन्ध्याटवी चातुरी
सञ्चारीकविकुम्भिकुम्भभिदुरो बाणस्तु पञ्चाननः ॥
